श्रावणमासः
वर्षम्–६७
दशमोऽङ्कः
विक्रमाब्दः २०७३
युगाब्दः ५११८
५ अगस्त २०१६

ISSN 2249-698X

# भारती

## संस्कृत-मासपत्रिका

एकस्याः प्रतेः
१५/–
वार्षिक–शुल्कम्
१२०/–
आजीवनसदस्यता
१५००/–




**श्रावणी पूर्णिमा धत्ते शुभामुत्सवमालिकाम्।**
**रक्षाबन्धमुपाकर्म दिवसं संस्कृतस्य च॥**

## विषय-सूची


| क्र.सं. | विषयाः | निबन्धकाराः | पृष्ठ-संख्या |
|---|---|---|---|
| १ | मङ्गलाचरणम् | श्री प्यारेमोहनशर्मा | ३ |
| २ | मासावतरणम् | श्री प्यारेमोहनशर्मा | ३ |
| ३ | सम्पादकीयम् | श्री प्यारेमोहनशर्मा | ४ |
| ४ | ज्ञेयं सदा संस्कृतम् | डा. सुरेन्द्र कुमार शर्मा | ६ |
| ५ | पुरुषार्थचतुष्टयसाधकं शिक्षणं धर्मः..... | डॉ हर्षदेवमाधवः | ६ |
| ६ | अद्वैतवेदान्ते आत्मतत्त्वविमर्शः | विष्णुदत्त जोशी | ७ |
| ७ | जानकीजीवनमहाकाव्यप्रणेतारः......... | डॉ. प्रहलादकुमार शर्मा | ८ |
| ८ | प्रकीर्णपद्यानि | पं. सत्यनारायणशास्त्री, अजमेर | ९ |
| ९ | पुस्तकसमीक्षा | म.म. देवर्षिकलानाथशास्त्री | १० |
| १० | रक्तबीजः | ऋषिराजजानी | १३ |
| ११ | बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने- | वेणीमाधव गो. धर्माधिकारी | १४ |
| १२ | प्रेरकप्रसङ्गशतकम् | मा. श्रीमती आराधना धर्माधिकारी | १५ |
| १३ | राजस्थानीय-रचनाधर्मितायां ....... | डॉ. एस.एन. झा | १६ |
| १४ | धर्मशास्त्रं च स्मृतिपदवाच्यम् | ममता गुप्ता | १८ |
| १५ | भारतीमञ्जुनिकुञ्जम् | डॉ. रामनारायण झा | २० |
| १६ | डॉ. जया दवे संस्कृत अकादम्या.... | प्रबन्ध संपादक | २१ |
| १७ | होराशास्त्रस्य वैशिष्ट्यम् | डा. विजेन्द्रकुमारशर्मा | २२ |
| १८ | भारतीयज्योतिषशास्त्रदृष्ट्या वृष्टेर्निर्णयः | निखिलेश शर्मा | २४ |
| १९ | संयुक्तपरिवारे कर्त्तव्यनिष्ठा.... | स्वाती जैनः | २७ |
| २० | नारी-स्तम्भः | डॉ. राजेश्वरी भट्टः | ३० |
| २१ | आयुर्वेद स्तम्भः | प्रो. बनवारीलालगौडः | ३२ |
| २२ | अथ षट्दर्शनसारदर्शकपत्रकम् | अंजना शर्मा | ३५ |


### पाठकेभ्यो निवेदनम्

संस्कृतसुधियः पाठकाः निवेद्यन्ते यद् भारत्यां प्रकाशिताः शोधलेखाः, सामयिकनिबन्धाः, कविताः, कथाः, विनोदवार्ताः, लघुनाट्यकृत्यादयो भवद्भ्यः कथं रोचन्ते ? स्वविचारयुक्तपत्राणि निम्नलिखितसङ्केतोपरि संप्रेष्यानुगृह्णन्तु– **सम्पादक, 'भारती' संस्कृतमासिक, भारतीभवन, बी–15, न्यू कॉलोनी, जयपुर–302001**

**दूरभाषः 0141–2379014, मो. 9783105699**

**(धनादेश/चैक/ड्राफ्ट केवल ''भारती'' के नाम से ही भेजें– प्रबन्ध सम्पादक)**



।। श्रीशः ।।

ISSN2249-698X

# भारती

संस्कृत-मासपत्रिका



**प्रमुखसंरक्षकाः**
जगद्गुरवो निम्बार्कपीठाचार्याः श्रीराधासर्वेश्वरशरणदेवाचार्याः,

**प्रमुखसंरक्षकाः**
जगद्गुरुशङ्कराचार्यस्वामिश्रीजयेन्द्रसरस्वतीमहाभागाः

**प्रेरणास्रोतः**
स्व. परमाचार्यः
श्रीचन्द्रशेखरेन्द्रसरस्वतीमहाभागः

संस्थापकौ
स्व. उमाकान्तकेशवआप्टे
( बाबा साहब आप्टे )
स्व. श्रीगिरिराजशास्त्री ( दादाभाई )

संरक्षकाः
स्वामी विश्वेशतीर्थः
स्वामी सत्यमित्रानन्दगिरिः
स्वामी रामभद्राचार्यः
आचार्यः अविचलदासः
स्वामी विद्यानन्दसरस्वती

प्रधानसम्पादकः
देवर्षिकलानाथशास्त्री

सम्पादकः
प्यारेमोहनशर्मा

प्रबन्धसम्पादकः
सुदामा शर्मा

सहसम्पादकाः
प्रो. सुरेन्द्रकुमारशर्मा
शिवशरणनाथत्रिपाठी

आर्थिकपरामर्शदाता
ओ.पी. गोयल

पृष्ठसंयोजनम्
श्याम प्रिन्टर्स, 22 गोदाम, जयपुरम्
rajeshksharma69@gmail.com - 01414001974

## मङ्गलाचरणम्

विद्वद्भिर्विधिना मुदा गिरिजया साकं सदा श्रावणे,
बिल्वैः पुष्पचयैः शुभाय जगतः संपूज्यते सादरम्।
भक्त्या तुष्यति योऽचिरं भगवता रामेण यः पूजितः,
देवैर्वन्दितपादपद्मयुगलः शम्भुः शिवायास्तु नः।।

## मासावतरणम्

मेघाः वृष्टिभिरार्द्रयन्ति वसुधां मासे शुभे श्रावणे,
उद्यानेषु वनेषु चापि ललनाः क्रीडन्ति कान्तैः सह।
चित्ताकर्षणमाचरन्ति सुषमाः प्रक्षालितैः पादपैः,
दोलान्दोलनमाचरन्ति युवकैः साकं नवोढाः स्त्रियः।।

कार्यालयः
बी-15, भारतीभवनम्
न्यू कॉलोनी, जयपुरम् ( राज. )
ई-मेल sanskritbharti09@gmail.com

श्रावणमासः
वर्षम् 67
वार्षिकशुल्कम् 120/-

विक्रमाब्दः 2073
अगस्त, 2016
पञ्चवार्षिकशुल्कम् 500/-
आजीवनसदस्यताशुल्कम् 1500/- रूप्यकाणि

अङ्कः - 10

( राजस्थानसंस्कृत-अकादम्या आर्थिकसहयोगेन प्रकाशिता )

## सम्पादकीयम्

# कश्मीरसमस्यायाःसमाधानम्

...✍ पं. प्यारेमोहनशर्मा

''**अवन्ध्यकोपस्य निहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः**'' भारवेरियमुक्तिर्भारते पूर्णरूपेण चरितार्था भवति। अत्रत्या नेतारः पौनःपुन्येन वदन्ति यत् पाकिस्तानं चेद् द्वौ भारतीयसैनिकौ हनिष्यति तर्हि भारतं चतुःसंख्याकान् तदीयसैनिकान् हनिष्यति। परन्तु सम्प्रति कश्मीरे प्रतिदिनं शतशो निरागसः सैनिकाः यात्रिणश्च हन्यन्ते। कश्मीरे हिजबुल-आतंकी बुरहान-वानेः मृत्योरनन्तरं पृथक्तावादिनः हिंसकान्दोलने संलग्नाः सन्ति। एतेन प्रतीयते यत् तत्रत्यः सर्वकारो हिंसामवरोद्धुमक्षमो विद्यते। विशालसंख्यायां जनाः हिंसकान्दोलने संलग्नाः विद्यन्ते। राजनैतिका यादृशाः प्रयासा अत्रापेक्षिताः सन्ति न तादृशा विधीयन्ते। इदं कथनं सम्प्रति सर्वथानुचितं विद्यते यत् कश्मीरे सम्प्रति स्थितिः सुधृता विद्यते। पृथक्तावादिनः आतंकवादिभिः सम्प्रत्यपि समर्थनं लभन्ते। वयं पश्यामो यत् पूर्वं ये पृथक्तागतिविधयः श्रीनगरसोपोरपर्यन्तं सुस्थिरम-विद्यन्त ते सम्प्रति दक्षिणभागमपि कश्मीरस्य स्ववशे कुर्वन्तः संलक्ष्यन्ते। एष स एव भूभागो यत्र पूर्वं पी.डी.पी. दलस्य सुदृढो जनाधारोऽविद्यत। तत्र जना विश्वसन्ति सर्वकारेषु। तत्रत्या जनाः स्वीकुर्वन्ति यत् केन्द्रसर्वकारो राज्यसर्वकारश्चोभावेव कश्मीरविषये सत्यनिष्ठया कार्यं कुरुतः। तत्र ग्रामेषु यादृशं वातावरणं सम्प्रति संलक्ष्यते तेन प्रतीयते यत् नूतनदृष्टया कश्मीर- समस्यायाः समाधानमन्वेषणीयम्। पञ्चषट् वर्षेभ्यः पूर्वं कश्मीरे यादृशः सौम्यभावोदयोऽजायत-सम्प्रति तद्विपरीतं दरीदृश्यते। पूर्वं जनाः सैनिकान् पुलिसं च विलोक्याविभ्यन् साम्प्रतं तद्विपरीतं पृथक्तावादिनः सेनायाः उपरि आग्नेयास्त्रान् क्षिपन्ति। पुलिसकार्यालयेषु सैनिकसन्निवेशेषु च लक्ष्यं निर्धार्यआक्रमणानि विधीयन्ते पुलिसकार्यालयेषु च शस्त्राघाता विधीयन्ते।

कश्मीरे जनाः पीडीपी-भाजपाघटबन्धनयोः सर्वकारं सन्देहदृशा सम्प्रति पश्यन्ति। जनाः विचारयन्ति यत् पीडीपी सत्तासुखाय भाजपा यामानदण्डेषु कार्यं विधास्यति। युवकेषु हताशा अवर्धत आक्रोशः समुदपद्यत ते न विश्वसन्ति यत् शासनासीना जनाः तेषां समस्यासु सहानुभूतिपूर्वकं विचारयिष्यन्ति। एभिरेव कारणैः बुरहानवानी सदृशो जनः (हीरो) सर्वमान्यो नेता चमत्कृतो नेता वा संजायते। अत्र नास्ति कोऽपि सन्देहो यत् बुरहान पृथक्तावादमप्रसारयत्। प्रतीयते यत् युवकान् लक्ष्यीकृत्य तेषां मनःसु सुदृढमिदं संस्थापितं यद् तेषां भविष्यत्कालः वर्तमान-शासनहस्तेषु सुरक्षितो न विद्यते।

बुहरान वानी हीरो वर्तते इति तत्रत्या जना एव प्रचारमकार्षुः। बुहारान जनमानसेषु पृथक्तायाः बीजं गहनतयावपत्। अन्यच्च कार्याभावोऽपि (बेरोजगारी) समस्यामवर्धयत्। पृथक्तावादिनामनुयायिनोऽप्यधिक-संख्यायां कार्याभावग्रस्ताः युवान एव विद्यन्ते।

कश्मीरे धारायाः 370 आवश्यकता विद्यते न वा ? स्वायत्ततायाः स्वरूपः कीदृशो भवेत्? कियत् संख्याकाः सैनिकास्तत्र सुस्थिरा भवेयुः? एषु विषयेषु गम्भीरं चिन्तनं भवेत्। बलप्रयोगेण संप्रति समस्यानां समाधानं न भवितुं शक्नोति। तत्र पृथक्तावादिनो विश्वासे नीत्वा वार्ताविषये समाधानविषये च सुदृढं चिन्तनं राजनैतिकाः प्रयासाश्च विधेयाः।

सिकन्दरमहान् विश्वविजयेच्छया नैकान् देशान् विजित्य तत्रत्यं विपुलं धनं नीत्वा परावर्तनकाले एकस्य राज्ञः राज्यमप्याचक्रमत्। तत्रत्यो राजा स्वकीयं मन्त्रिणं सिकन्दरसमीपे प्राहिणोत्। सन्देशं प्रैषयच्च भवन्तो भोजनाय मम राजभवने समागच्छन्तु। नाहं भवद्भिः सह योद्धुमैच्छम्। सिकन्दरस्तदीयमामन्त्रणं स्वीकृत्य राजभवनमगच्छत्। राजा

तस्य महता समारोहेण स्वागतमकार्षीत्। स्वागतानन्तरं सिकन्दराय भोजनं विभिन्नेषु स्वर्णरजतपात्रेषु पर्यवेषयत्। न्यवेदयच्च भोजनं कुर्वन्तु भवन्तः। यदा सिकन्दरो भोजनपात्रमुदघाटयत् तदा पात्रे स्वर्णमुद्राः रत्नानि च दृष्ट्वावदत् किमिदं भोज्यं विद्यते। राज्ञा उक्तं-पूर्वं श्रीमन् मदीयकोषं स्वीकुर्वन्तु ततश्च भोजनं कुर्वन्तु। भवतां सविधे सुविपुलं धनं विद्यते परन्तु भवन्तस्तेन नातृप्यन्। अतः इदमपि नीयताम्। परन्तु श्रीमद्भिः सह कियत् धनं यास्यतीति विचारोऽपि विधेयः। सिकन्दरः क्षणेन सर्वमचिन्तयत् अकथयच्च भवद्भिः सम्यगवबोधितोऽस्मि। सर्वमत्रैव स्थास्यति नाहं जाने कः भोक्ष्यति कुत्र वा गमिष्यति धनमिदम्।

अतः पृथक्तावादिनः इदं धनं मया लब्धं प्राप्स्यामीदपि असौ मया हतः शत्रुर्हनिष्ये चापरानापि, परन्तु मरणानन्तरं जानन्ति किं पृथक्तावादिनः यत् ते कुत्र जनिमवाप्स्यन्ति, कस्मिन् देशे वा जनिं लप्स्यन्ते। ये सम्प्रति कश्मीरे आत्मनोऽधिकारमभिलषन्ति अन्यस्मिन् जन्मनि अपरे देशे अपरजातौ यदि समुत्पन्नाः तदा कश्मीरस्तेषां पृथक्तावादिनामेव भवेदिति अभिलाषं विधास्यन्ति न वेति। इति सर्वं शान्त्या तेभ्यः प्रशिक्षणीयम्। सम्प्रति च राजनैतिकदृष्टया रोजगारदृष्ट्या च तेषां समस्यानां समाधानं विधातव्यम्। विश्वासः समुत्पादनीयः। सत्यामाव-श्यकतायां क्रोधोऽपि विधेयः, दण्डोऽपि प्रदेयः। इत्येव वर्तते समस्यायाः समाधानम्।

**( संस्कृत समाचारः )**

## सुनीलेन ''विश्वविक्रमः'' ( World record ) कीतिमानम् इति स्थापितम्

जयपुरस्थराजकीयमहाराज-आचार्य-संस्कृत-महाविद्यालयस्य छात्रेण सुनीलेन द्विसंख्यात्मकाङ्कस्य (Square root of two) वर्गमूलस्य 5710 संख्यापरिमितं (1.414213562373) अङ्कान् कण्ठस्थीकृत्य अनवरतम् एकहोरा द्विचत्वारिंशत् निमेषात्मके समये श्रावयित्वा अमेरिका-देशस्य मार्क- उमाइल इत्यस्य विश्वविक्रमस्य (W.R.) खण्डनं कृतम्। मार्क-उमाइल-महोदयेन 2006 तमे वर्षे (Square root of two) इत्यस्य 5544 संख्या- परिमितमेव कण्ठस्थीकृत्य विश्वविक्रमः स्थापितः आसीत्। सुनीलेन तमतिक्रम्य स्वस्य विश्वविक्रमः स्थापितः।

सहैव सुनीलेन 24.6.16 तमे दिनाङ्के नवदिल्याम् एशिया-बुक-रिकार्ड्स इति इण्डिया बुक ऑफ रिकॉर्ड्स इति च संस्थयोः कार्यालये एकनिमेष एव (Square root of two) इत्यस्य 240 अङ्कपरिमितम् अङ्कान् श्रावयित्वा दक्षिण-भारतस्य जॉनकैरि इत्यस्य (एक- निमेषे 59 अङ्कपरिमितं) राष्ट्रीय-विक्रममपि संत्रोट्य स्वस्य विक्रमः स्थापितः।

सुनीलेनोक्तं बाल्यकालेऽहं नासम् एतादृशः मेधावी, किन्तु प्राथमिकस्तरतः स्नातकस्तरपर्यन्तं संस्कृतमाध्यम द्वारा अध्ययनस्य कारणादेव, तत्रापि विशेषतः वैदिकगणि-तस्याध्ययनेनैवाहम् एवं कर्तुं समर्थो-ऽभवम्। संस्कृत-भाषायाः स्मरणशक्तेः संवर्धनेऽस्ति महान् प्रभावः अनेनोक्तं यत् एतादृशं कार्यं सर्वे कर्तुं शक्नुवन्ति एतदर्थं वैज्ञानिकसिद्धान्तानुरूपं चलनीयं भवति। अर्थात् एतादृशे कार्ये अस्माकं मस्तिष्क इदं कार्यं करोति वाम मस्तिष्कं 10 प्रतिशतं दक्षिणमस्तिष्कं 90 प्रतिशतं काल्पानिकं, दृश्यात्मकं कार्यं करोति। तेन स्मरणं सारल्येन भवति।

प्रतिभावान् सुनीलः अद्यत्वे ''मुझे कौन रोक सकता है।'' इति प्रेरणाप्रद पुस्तकस्य लेखने व्यस्तोऽस्ति।

अनन्तरं सः स्वस्य स्मरणशक्तेः रहस्यो-द्घाटनात्मक-पुस्तकमपि प्रकाशितं करिष्यति।

सुनीलेनोक्तं एतत् सर्वं मया गुरुजनानां प्रेरणया आशीर्वादेन च सम्पादितम्।



विशेषतः डा. चन्द्रप्रकाश शर्मा, प्रेमराज वर्मा महेश शर्मा च। एतेषां सततं प्रेरणया उत्साहवर्धनेन च मया विश्वविक्रमः World record सदृशं कार्यं कृतमस्ति।

भारतीपत्रिकापक्षतः रतत्कृते आयुकान्तं सुनीलं प्रति कोटिशः वर्धापनानि शुभाशयाश्च।



श्री दादू आचार्यसंस्कृतमहाविद्यालयस्य पूर्वप्राचार्यैः न्याय साहित्याचार्यैः
स्व. श्री बलरामस्वामिभिः कृतं संस्कृत-संस्तवनम्-
( संस्कृतदिवसमुपलक्ष्य प्रस्तूयतेऽत्र )

# ज्ञेयं सदा संस्कृतम्

❑ प्रस्तोता -डा. सुरेन्द्र कुमार शर्मा

भाषा नाम मनुष्यवाग्व्यवसितं शब्दार्थयुग्माञ्चितम्
अन्योऽन्यस्य विचारबोधनपरं यद् वक्तृबोद्धव्ययोः।
वर्णैः शब्दपदक्रमोपरचितैर्वाक्यात्मनोच्चारितैः
तत्तद्भाषणपद्धतेर्नियमतो यत्रास्ति वाग्विस्तरः॥ १॥

तत्तद्देशविशेषमानवकुलैराजीवनं भाषिता
भाषा यद्यपि यत्र तत्र शतशो लोके प्रसिद्धिं गताः।
अस्माभिस्तु निसर्गसुन्दरतरं भाषोत्तमं संस्कृतं
साङ्गोपाङ्गविचारगोचरतया प्रस्तूयते साम्प्रतम्॥ २॥

सृष्ट्यादौ परमेश्वरेण गुरुणा बह्मर्षिसन्देशितै-
र्वेदाङ्गैरभिवर्धिता सुमहिता या सभ्यता संस्कृतिः।
सैषा सन्निहिता सनातनतया सम्भाषिते संस्कृते
तत्सौन्दर्यदिदृक्षवो यदि वयं तत् संस्कृतं सेव्यताम्॥ ३॥

यां वाचं समुपासते दिविषदो विश्वे विधात्रादयो
यस्यामायतते हविः क्रतुभुजां धर्म्यं च कर्माखिलम्।
यामाराध्य नृपा नरा यमिवराः स्वाभीष्टसिद्धाः पुरा
तां कल्याणमयीमुतामृतमयीं दैवीं गिरं राध्नुमः॥ ४॥

अस्मत् पूर्वजविश्ववन्द्यविदुषां या ब्रह्मविद्या परा
विज्ञानं च मनुष्यजीवनकृते यद्यत् समाविष्कृतम्।
चित्ताह्लादकरः कथासमुदयो विश्वप्रशस्तो हि यः
सर्वं संस्कृतगर्भितं कथमिदं ज्ञेयं विना संस्कृतम्॥ ५॥

आर्यैर्विश्वप्रशंसितोत्तमतमा स्वा सभ्यता संस्कृतिः
ज्ञातुं चानुविधातुमद्य सुशका सा संस्कृतेनैव भोः।
अन्ये चापि तदार्यसंस्कृतिगुणान् जिज्ञासमाना यदि
तत्तेषां हि कृतेऽपि संस्कृतपरिज्ञानं महावश्यकम्॥ ६॥

आर्याणां तु कृते हि संस्कृतमिदं स्यादात्मभाषोत्तमं
तत्तेषां परमं धनं च परमो गर्वाभिमानोत्सवः।
लोके संस्कृतभारती हि परमा शोभाऽर्यजातेरिह
तस्मादार्यपरम्परीयपुरुषैर्ज्ञेयं सदा संस्कृतम्॥ ७॥

**प्राचार्यः- श्री दादू आ.सं. महाविद्यालयः, जयपुरम्**

---

**मुरारिबापूसूत्राणि**

❑ डॉ हर्षदेवमाधवः

# पुरुषार्थचतुष्टयसाधकं शिक्षणं धर्मः, न व्यवसायः

प्रातः शिक्षणाद् आरभ्य लोकशिक्षणपर्यन्तं मम शिक्षण-यात्रा वर्तते। शिक्षणं पुरुषार्थचतुष्टयसिद्धिकरं वर्तते। शिक्षणं धर्मोऽस्ति, न व्यवसायः। प्राचीनकाले गुरवः तपोवनेषु शिक्षणं दत्त्वा दक्षिणां प्राप्नुवन्। अतः शिक्षणेन धनलाभः समीचीनः किन्तु शिक्षकस्य कृते शिक्षणप्रदानं तस्य धर्मो भवेत्। अधुना शिक्षणात् धर्मः भ्रष्टः, केवलम् अर्थोपार्जनम् अवशिष्टम्। शिक्षणं सर्वेषां कायम् अपि वर्तते। यथा ग्रामे कृषकः स्वपुत्राय कृषि- शिक्षणं ददाति, कुम्भकारः मृत्तिकाकलां शिक्षयति तथैव सर्वमपि ज्ञानं शिष्याय दातुं मनसि कामना भवेत् इत्थं शिक्षणं नाम पुरुषार्थः। शिक्षणेनैव अस्माकं मोक्षः। या मुक्तिं ददाति सा विद्या। विचारस्वात्रंत्र्यं ददाति सा विद्या। या अर्थप्राप्तिः शक्या सा विद्या। इत्थं पुरुषार्थचतुष्टयस्य सिद्धिकारकं शिक्षणं श्रेष्ठार्थे वर्तते।

**प्रतिष्ठा निन्दाकर-ग्रहीत्री**

यदा मनुष्यः यशो लभते, प्रतिष्ठां लभते तदा जनाः तस्य निन्दां कुर्वन्ति, तस्य प्रतिष्ठां मलिनीकर्तुं प्रयतन्ते। अत एव अहं कथयामि यत् यथा सर्वकारः धनोपार्जने करान् गृह्णाति तथैव प्रतिष्ठापि मनुष्यात् निन्दारूपं शुल्कं करं गृह्णाति। अहं प्रतिदिनं करं ददामि। केचित् पत्रैः केचित् पत्रव्यवहारेण, केचित् व्यवहारेण मम निन्दां कृत्वा प्रतिष्ठां न्यूनां कर्तुं प्रयतन्ते। आलोचना वा टीका व असूया वा शिवस्य तृतीयं नेत्रं वर्तते।

जननिन्दात्मकं तृतीयं नेत्रं मां दृष्ट्वा उद्घाटितं भवति तदा निन्दकस्य, टीकाकारस्य स्वरूपे अहं शिवदर्शनं करोमि। गुरुकृपया तृतीयं नेत्रं केवलं कामं दग्धुं प्रभवति रामं दग्धुं न प्रभवति। रामस्य अहर्निशं स्मरणं मां निन्दायाः रक्षति सहस्रशत-असूयकानां मध्येऽपि निन्दकानां मध्येऽपि सुरक्षितः अवशिष्टः। अतः प्रतिष्ठा-व्यक्तेः प्रतिभां दूषयितुं प्रयत्नं करोति। प्रतिष्ठा निन्दाकर- ग्रहीत्री वर्तते।

# अद्वैतवेदान्ते आत्मतत्त्वविमर्शः

❑ विष्णुदत्त जोशी

**सत्यानृतसमासक्तं जगदेतत् प्रवर्तते।**
**आत्मतत्त्वं सदा सत्यं मिथ्याभूतमिदं जगत्।।**

**तथ्यातथ्यपरिज्ञानं दृक्छास्त्रै क्रियते बुधैः।**
**तथ्यं सर्वज्ञचैतन्यमतथ्यं जगत् स्मृतम्।।**

**स्वसिद्धान्तदिशा सर्वैस्तत्त्वं सम्परिचीयते।**
**अतो दर्शनशास्त्रेषु प्राधान्येनैव चिन्तनम्।।**

दर्शनशास्त्राणां तथ्यातथ्यविवेचनविधावुपयोगितया यन्नित्यं सत्यं परमतथ्यञ्चास्तिकनास्तिकोभयविधशास्त्रेषु विविच्यते। तत्र कानिचित् साक्षादीश्वरवादीनि, कानिचिच्च परम्परया तत्त्वबोधकानि। तत्र नास्तिकेषु चार्वाकाः ब्राह्मणोऽहं स्थूलोऽहं जानामि गच्छामीत्यादिसामानाधिकरण्यप्रतीतेः ब्राह्मणत्वादिधर्मवति शरीर एव ज्ञानसुखाद्याश्रयत्वं सिद्ध्यतीति शरीरमेवात्मा, अत्र श्रुतिः स वा एष पुरुषोऽन्नरसमयः चार्वाकदेशिनो हि काणोऽहं बधिरोऽहमितीन्द्रियधर्मसामानाधिकरण्यदर्शनात् सुषुप्तिदशायां चक्षुरादीनामुपरमेऽपि मनसा सर्वव्यवहारदर्शनात् तस्य नित्यत्वाच्च मन एवात्मा। अत्र श्रुतिः अन्योऽन्तरात्मा मनोमयः' प्राणैर्विना व्यवहारादर्शनात् पिपासावानहमित्याद्युपलब्धेश्च प्राण एवात्मा, अत्रापि श्रुतिः 'अन्योऽन्तरामा प्राणमयः'।

सौगतेषु शून्यवादिनो माध्यमिकाः सुषुप्त्यव्यवहितोत्तरक्षणमुत्थितस्य सुषुप्तावहं न किञ्चिदन्वभवमित्यनुभवाच्छून्यमेवात्मेति सङ्गिरन्ते। तत्र श्रुतिः असदेवेदमग्र आसीदेकमेवाद्वितीयं क्षणिकविज्ञानवादिनो योगाचार्यास्तु क्षणिकविज्ञानमेवात्मा तच्च द्विविधं प्रवृत्तिविज्ञानम्, आलयविज्ञानञ्चेति। तत्रायं घट इत्यादौ घटादिविषयकप्रवृत्त्या प्रवृत्तं विज्ञानं प्रवृत्तिविज्ञानमुच्यते। अत्रापि श्रुतिमानम् **'अन्योऽन्तरात्मा विज्ञानमयः'** सौत्रान्तिकास्तु ज्ञानाकारानुमेय-क्षणिकब्रह्मार्थ एवात्मेतीच्छन्ति। वैभाषिकाश्च क्षणभङ्गुरवादिनः क्षणिकब्रह्मार्थ एवात्मेतीच्छन्ति।

आस्तिकेषु सांख्या आत्ममूलप्रकृतिमहदहङ्कारपञ्चतन्मात्राषोडशविकारभेदात् पञ्चविंशतितत्त्वानीति कथयन्ति। तत्र शीकरनिर्लिप्ततामरसपलाशवत् कर्तृत्वभोक्तृत्वादिनिर्लिप्त आत्मा, स च प्रकृतिर्न विकृतिर्न च कारणं न कार्यम्। पातञ्जला अपि सांख्यसम्मतं कर्तृत्वभोक्तृत्वादिविरहितं कार्यकारणहीनमेवात्मेति स्वीकुर्वन्ति। परञ्च तन्नये आत्मा योगगम्यः, योगश्चित्तवृत्तिनिरोधनं, तच्च चित्तस्य बाह्यविषयनिवर्त्तनादन्तराभिनिवेशः। एवं प्राणान्निरुध्यात्मना सह शिवस्यैक्यभावनं समाधिः। अष्टाङ्गसमन्वितेन योगेन यच्छिवमयं ज्योतिरवलोक्यते तदेवात्मा।

मीमांसकास्तु कर्मेश्वरः स्वर्गादिकमेव पुरुषार्थः, मन्त्रमयी देवता अर्थवादवेदो न प्रमाणमिति गदन्ति। मीमांसकैकदेशिनस्तु परिचारककृतकर्मणः फलदाता यथा भूपालस्तथा वेदोक्तकर्मणः फलदातेश्वर एवेति जल्पन्ति।

**राजस्थान-संस्कृत-अकादमी**
**जयपुरम्**

# जानकीजीवनमहाकाव्यप्रणेतारः डॉ. दशरथद्विवेदिनः

❑ डॉ. प्रहलादकुमार शर्मा

दशरथद्विवेदी मूलतो गर्गगोत्रीयः सरयूपारीणभूदेव-वंशोत्पन्नः। द्विवेदिनः पितुर्नाम श्रीरघुनाथद्विवेदी यः स्वतंत्रतासेनानी आसीत्। मातुर्नाम श्रीमती प्यारीदेवी या सद्गृहिणी आसीत्। रघुनाथद्विवेदिनः सनकादिसंख्याः (चत्वारः) सुता आसन्। तेषु तृतीयो दशरथद्विवेदी वर्तते।

**जन्मस्थानम् -**

दशरथद्विवेदिनो जन्म जौनपुरमण्डलान्तर्गत-पचवलग्रामे उत्तरप्रदेशेऽभवत्। पचवलग्रामो जौनपुर-मण्डलस्य दक्षिणदिशि अन्तिमो ग्रामो वर्तते। पवित्रा निर्मला नदी च एतस्य ग्रामस्य पार्श्वे स्थिता वर्त्तते। पचवलग्रामात् दक्षिणदिशि गंगायमुनाऽदृश्यसरस्वतीनां संगमः प्रयागः, अत्र 100 किलोमीटर दक्षिणपश्चिमदिशि तथा च रामजन्मभूमिरयोध्या 150 किलोमीटरदूरे पश्चिमोत्तरदिशि अवस्थिता विद्यते। अर्थात् पचवलग्रामः साक्षाद् देवभूमिः वर्तते, यस्य चतृषु दिशासु देवभूमिर्वर्तते।

**जन्मसमय :-**

दशरथद्विवेदिनो जन्म 1999 तमे वैक्रमाब्दे श्रावण-शुक्लपक्षदशम्यां शुक्रवासरेऽभवत्। तदनुसारेण जन्म 21 अगस्त 1942 तमे वर्षेऽभवत्। किन्तु पाठशालीय-त्रुटिवशेन शिक्षाक्षेत्रे जन्म '14 दिसम्बर 1940 इति विद्यते तथा मन्यते च।'

**शिक्षा-दीक्षा -**

प्राथमिकशिक्षा ग्रामे एव सर्वकार्यपाठशालायाम् एवाभूत्। उच्चप्राथमिकशिक्षा जूनियरहाईस्कूल-भदोही इत्यस्मिन् शिक्षास्थाने सम्पन्नाभवत्। अष्टमीकक्षायाम् आंग्लभाषायां, संस्कृत-भाषायां गणितविषये चोत्तमाङ्कान् प्राप्तवान्। अस्मात् कारणात् अमुं धर्महितकारिणी संस्कृतपाठशाला भदोही मध्ये संस्कृतपठनाय प्रेषितवान्। अत्र शिवशंकरो मिश्रः नव्यव्याकरणे दक्षपण्डितः ज्योतिषशास्त्रस्य अग्रणी विद्वान् आसीत्। संस्कृतविश्वविद्यालयवाराणस्याः साहित्य-विषयेऽयं शास्त्रिपरीक्षां प्रथमश्रेण्यामुत्तीर्णवान्। एम.ए. परीक्षां गोरखपुरविश्व-विद्यालय-गोरखपुरतः (गोरक्षपुरतः) दत्तवान्। 1966 तमे वर्षे एम.ए. परीक्षायां प्रथमश्रेणीं विश्वविद्यालयपदकं कलासंकायस्वर्णपदकं च प्राप्तवन्तः एते महाभागाः। ''संस्कृतकाव्यशास्त्रे अलंकाराणाम् उद्भवस्य विकासस्य च परिवर्त्तनस्य च दिशः'' इति विषयं स्वीकृत्य-आचार्य-परीक्षां सम्पूर्णानन्दसंस्कृतविश्व-विद्यालये सर्वाधिकाङ्कान् प्राप्य विश्वविद्यालयस्य स्वर्णपदकं (हेमपदकं) प्राप्तवान्। तदनन्तरं गोरखपुरविश्वविद्यालये एव सहायकाचार्यपदे नियुक्तिं प्राप्तवान् तत्र सहायकाचार्य-सहाचार्याऽचार्य-पदमलंकुर्वन् अन्ते अध्यक्षपदं प्राप्तवान्। अन्ते ततः सेवानिवृत्तिं प्राप्तवान्।

**कृतित्व-परिचय :-**

डॉ. दशरथद्विवेदी न केवलं महाकविः, अपितु उच्चस्तरीयसंपादकः सरसकविः स्तोत्रकारोऽपि भवान् अस्ति। एते महाभागाः अनेकासां कृतीनां संपादकाः तथा च रचनाकाराः अपि सन्ति। प्रकाशिता अपि काश्चित् कृतयः सन्ति।

1. वक्रोक्तिजीवितम्
2. अभिनवरससिद्धान्तः
3. किरातार्जुनीयम्
4. कादम्बरी कथामुखम्
5. शिशुपालवधम् (महाकाव्यम्)
6. रामायणवर्षावर्णनम्
7. छन्दोऽलंकारमञ्जरी
8. संस्कृतसाहित्य में स्तोत्र काव्य
9. राघवेन्द्रचरितम्

10. कुमारसम्भवम् (महाकाव्यम्)
11. डॉ. मनोहरलोहिया 12. त्रिपुरदाहः
13. महेन्द्रविजयम् 14. श्रीकृष्णविजयम्
15. अलंकारों का उद्भव और विकास
16. जानकी जीवनम् (महाकाव्यम्)
17. रसाभिव्यक्तिः

इत्येषु ग्रन्थेषु क्वचिद् अर्धस्य गन्थस्य टीका लिखिता। तथा केषाञ्चित् नवनिर्माणं कृतवान् सः। कस्यचिद् उपरि द्वित्रसर्गपर्यन्ता व्याख्या लिखिता कस्यचिद् ग्रन्थस्य संकल्पना विहिता।

**राजकीय-वरिष्ठोपाध्याय-**
**संस्कृत-विद्यालयः, सामोद (जयपुरम्)**

# प्रकीर्णपद्यानि

❑ पं. सत्यनारायणशास्त्री, अजमेर

**पदापेक्षावन्तः, सुकृतनिरपेक्षाऽनयजुषो,**
**दुराचाराधाराः प्रतिपदमृषाभाषणपराः।**
**विदेशेष्वैते स्वं, विदधति निगूढं तदखिलं,**
**नरान्नेतृत्वाद्धि प्रपतनपरान्साधु नमत।। 1।।**

**फलं तैलं शाकं फलसहितभैषज्यमखिलं,**
**धनं मुद्रारूपं, वसनमशनं वस्तुनिवहः।**
**समुत्पन्ना षालाः परिखनलिकातः किमधिकम्**
**हरिद्रादिद्रव्यं, मिलति कृतकं भारतभुवि।। 2।।**

**प्रभुज्याऽऽभोज्यं क्षुत्प्रशमनकृतेऽपद्रवयुतं,**
**निपीयाऽशुद्धं वार्भवति समदो मानवगणः।**
**चिकित्साकर्माणों ददति कृतकं भेषजमहो!**
**वयं किं ब्रूमो हा ! मरणमिह राष्ट्रे विहरति।। 3।।**

**कृतोपचारैरिह कृत्रिमौषधैः,**
**सवित्तनाशं निधनं प्रयान्ति हा।**
**सहस्रशोऽजस्रमनन्तसंख्यका,**
**आबलवृद्धास्तरुणाश्च योषितः।। 4।।**

## युग्मकम्-

**महाभ्रष्टाचाराऽधिगतजनुषोऽनेकतनया**
**सदा नानारूपैरधिविषयमेते गतभियः।**
**क्वचिन्मानोनत्वं क्वचिदपि कुसम्मिश्रितमलं,**
**क्वचित्कृष्णार्थोऽयं सततमुपदापोषितबली।। 1।।**

**अवश्यं वो भावि, निपतनमधोलोकगमनं,**
**न कश्चिंत् पातुं ना नयनपथमायास्यति मुहुः।**
**समे मौनं धृत्वाऽभिदधति वचः स्वार्थपटवः**
**परं ध्यानं दध्यं दुरितकलशो भङ्क्ष्यत इह।। 2।।**

**विकलवृद्धनिरुद्यमसज्जनान्कुल-**
**भवान्कुलसम्मतमानवान्।**
**उचितकर्मविधानविलङ्घनात्**
**परिजनोऽरिजनोऽप्यभवन्महान्।। 3।।**

**प्रगतिपथमितानां, नीवृति-भ्रष्टसत्ता,**
**प्रतिपदमनिवार्या मन्तवो राष्ट्रमध्ये।**
**प्रसरति विषयेऽस्मिन्नुग्रवादेन सत्राः**
**विविधयवनदेशीयोऽपि चातङ्कवादः।। 4।।**

**कृते पूर्णे यत्ने यदि न लभते ना सफलतां,**
**सदिष्टं दिष्टं नो दिशति यदि सिद्धिं दरमपि।**
**तदा भूयो भूयो जगति यतनीयं दृढतया,**
**तयाऽवश्यं भाग्यं, फलमविफलं दास्यति लघु।। 5।।**

**परास्यापेक्षित्वं भृशमवरमास्ते बुधकृते,**
**ह्यतो भाव्यं नित्यं निजनियतिशक्त्या धृतिजुषा।**
**परास्यापेक्षी ना परिभवमुपैति ध्रुवमलं,**
**सदा सभ्यो लोकस्त्यजति न सृतिं सद्भिरचिताम्।। 6।।**

**भ्रष्टाचारो दशास्यो हरिहयनगराद्वर्धमानो विशालो**
**दुर्दान्तो भ्रष्टनेतृप्रवरबलयुतोऽवध्य एवाऽस्ति राष्ट्रे।**
**रामस्त्रैलोक्यनाथः प्रतिशरदफलो किं न जानाति हन्त!**
**वारं वारं सनिघ्नन्कथमपि विवशो नैष पारं प्रयाति।।7।।**

पुस्तकसमीक्षा

❑ म.म. देवर्षिकलानाथशास्त्री

# उत्कृष्टं स्तोत्रशतकम्

सुप्रथिता एव विद्वज्जगति प्रातः स्मरणीया धर्म-चक्रवर्तिनः कविकुलसम्राजः संस्कृत-वैदुष्याय राष्ट्रपतिना सम्मनिताः "पद्मभूषणालङ्कारेण" सभाजिताः महामहोपाध्याया अगाधवैदुष्यविभूषिताः "भार्गवराघवीया" दिमहाकाव्यप्रणयनेन लब्धयशसो "लघुरघुवरादि " काव्यसर्जनेन सन्तर्पितविद्वन्मण्डलाः, अनेकासां नाट्यकृतीनां प्रणेतारश्चित्रकूटस्थतुलसी पीठाधीश्वरा जगद्गुरु-रामानन्दाचार्यपरम्पराविभूषका जगद्गुरुरामभद्राचार्यविकलाङ्गविश्वविद्यालयस्य संस्थापकास्तस्याजीवनं कुलाधिपतयश्च श्रीराम-भद्राचार्याः। अलौकिकप्रतिभासंवलितप्रज्ञाचक्षुषां कविमूर्धन्यानां विद्वत्कुलचूडामणीनामेषां व्याख्यान-कौशलं प्रसारमाध्यमेभ्यो देशे विदेशेषु चानुशीलितमेव प्रेक्षकैः, अलौकिकं वैदुष्यं, काव्यप्रणयनप्रौढिश्चापि सुविदिता विद्वत्प्रवराणामेषाम्।

एवंविधाया असाधारणकाव्यप्रणयनप्रतिभाया नवीनतमनिदर्शनरूपेण सुधीवराणामेषां सुविशालोऽपरो ग्रन्थः सपद्येवावतीर्णो यो हि श्रीरामभक्ते र्विविधान् पक्षान् समवलम्ब्य हृदयावर्जकशैलीसन्दृब्धस्य स्तोत्रशतकस्य सङ्कलनरूपोऽस्ति। अस्मिन् हि श्रीराघवं, सीतां, हनूमन्तं, दशरथ-कौसल्या-माण्डवी-ऊर्मिला-श्रुतकीर्ति-प्रभृतानि प्रणम्यानि पात्राणि, गङ्गां, गोस्वामितुलसीदासं, भरत-लक्ष्मण-शत्रुघ्नादीन्, वाल्मीकि-मयोध्यां चित्रकूटं, मिथिलामन्यानि च रामभक्ति-सम्बद्धानि प्रेमपूतभक्तेरालम्बनानि सम्बोध्य प्राञ्जल-प्रौढशैली-मवलम्ब्य प्रणीतानि शतं स्तोत्राणि संगृहीतानि सन्ति। आचार्यचरणानामेषां कविकौशलं सर्वेष्वेषु स्तोत्रेषु स्फुटं प्रतिभासते यत इमानि विविधेषु च्छन्दःसु निबद्धानि सन्ति, शिखरिणी-पञ्चचामर-वसन्ततिलकोपजाति-शार्दूलविकीडितार्यानुष्टुप्प्रभृतीनि वार्णिकच्छन्दांस्यपि काव्यप्रणयनेऽत्र प्रयुक्तानि, गीतयोऽपि विरचिताः, सर्वविधानां माध्यमानामुपयोगो विस्तृतं फलकं काव्यरचनाया उपस्थापयत्यस्मिन् काव्यशतक-संग्रहे।

विशेषत उल्लेखनीयमेकं काव्यमस्मिन् सङ्कलने विदुषां ध्यानमाकर्षति यत् सीतासुधानिधिशीर्षकवहं काव्यमस्ति यत्र चत्वारस्तरङ्गा निबद्धाः कविवर्येण येषु बहुविधा भक्त्युद्रेकचमत्काराः अपि द्रष्टुं शक्यन्ते, काव्यपाटवचमत्कारा अपि। भूमिजाया जगज्जनन्याः सीताया भक्तिस्तु सर्वत्र विलसत्येव, तृतीये तरङ्गे लालीलाला लाली, शशीशाशीशशाशाशी, इत्यादीनि केवलमेकं वर्णमादाय विरचितानि पद्यानि विलक्षणं कञ्चन चमत्कारं प्रतिनिदधति। सर्वेष्वेषु स्तोत्रेषु काचन भक्तेः प्रखरा प्रवणता, काचन शैल्या नवीनता, वर्णनस्य कश्चन विशेषो वा प्रत्यक्षीकरिष्यते पाठकैः।

शतस्तोत्रीसंग्रहस्यास्य विशेषोऽस्ति यत् प्रतिपद्यं हिन्द्यामनुवादोऽपि सहैव मुद्रितः। बहुत्र न केवलमयमनुवादस्य भूमिकां निर्वहति अपि तु भाष्यस्य भूमिकां वहति। बहुत्र च पद्यानुवादो हिन्द्यां स्वयमेकं स्तोत्रं पृथक् प्रस्तौतीति प्रतीयते पाठकाय। अतो हिन्दीटीकेयं कुत्रचन "भावार्थ" पदेनाभिहिता, कुत्रचन "भक्ति- टीका" पदेन, कुत्रचन भावानुवादपदेन। अपर एकश्चमत्कारोऽत्र संनिविष्टो द्रक्ष्यते पाठकैः। अस्माभिरा-राध्यदेवताः स्तोत्रैरर्च्यन्ते। सर्वदेवमयी गौरप्यस्मा-कमाराध्या। श्रीरामभद्राचार्यैः स्तोत्रशतकेऽस्मिन्ने-कमद्भुतं स्तोत्रं गवे समर्पितमस्ति, स्तोत्रमिदं "गो-सहस्रनाम" रूपं वर्तते यद्धि त्रिकालातीता, अभूतपूर्वा नूतनैवावतारणाऽस्ति गोमातुर्नामसहस्रसंरचनायाः। चारुवत्सा चारुखुरा चारुगा चारुसुस्तनी इत्यादिहृदया-वर्जकपदनिबद्धोऽयं सहस्रनामसन्दर्भो विलक्षणं प्रातिभं प्रकर्षं प्रतिनिदधातीति सर्वेऽप्यनुभवेयुरेव, नाऽत्र

कस्यचन काऽपि टिप्पण्यपेक्षिता। किन्तु स्तोत्रेण सहैव गोमातरमाराधयितुं सहस्रनामहवनस्यापि प्रकारः प्रदर्शितः ''ओं चारुवत्सायै नमः'' ''ओं चारुखुरायै नमः'' इत्यादि । सेयं गोभक्तेर्नवीनः पन्थाः सर्वात्मना प्रशस्यः प्रणम्यश्चेति सर्वस्यास्य विलक्षणस्य मार्गदर्शन-स्योपलक्ष्ये आचार्यचरणेषु सहस्रशो वर्धापनैः सह सहस्रशः प्रणतीरेव समर्पयितुं हृदयमस्माकमभिलषेत्।

विशालस्यास्य स्तोत्रसंग्रहस्य प्रारम्भे भारतप्रसिद्धानां विदुषां शुभाशंसा अपि मुद्रिताः। एतस्य लोकार्पणं गोदावरीतटे उज्जयिन्यां महाकुम्भमहामेलकावसरे समपद्यतेति सूचनाऽस्माभिरधिगता। स्तोत्रशतकस्यास्य हार्दिकं स्वागतं समस्तेऽपि देशे कृतज्ञैः पाठकैर्विधास्यते इत्यत्र नास्ति संशीतिलेशः।

**श्रीशतस्तोत्री** कविः श्रीरामभद्राचार्यः सम्पादकः डॉ. सुरेन्द्रशर्मा सुशीलः प्रका. श्रीतुलसीमण्डल डी-255, गोविन्दपुर, गाजियाबाद, उ.प्र. पृ. 555 रु. 200/-.

## 'सन्त' शिरोमणीनामभिनन्दनकाव्यम्

उत्तरभारते सर्वत्र भक्तिसरितायाः पावनप्रवाहेण देशं पावितवतां सुप्रथितानां रामानन्दाचार्याणां पीठानि राजस्थाने, गुर्जरेष्वन्यत्र च भारते प्रसृतानि सन्ति। एतेष्वेकतमं पीठमस्ति जयपुरं निकषा शाहपुरोपन-गरपरिसरे ''त्रिवेणीधाम'' नाम्ना प्रसिद्धम्। तस्याधिपतयः श्रीसन्तनारायणदासजीमहाराजाः ''खोजी'' द्वारा-चार्यत्वेन सर्वत्र सम्मानिताः सन्ति। गुर्जरेषु ''डाकोर'' धाम्नि यद् ब्रह्मपीठमस्ति श्रीरामानन्दाचार्यानुवर्ति, तस्यापीमेऽधिपतयः सन्ति। शाहपुरातो ''ब्रह्मपीठ-सन्देशाख्यं हिन्दीमासिक'' पत्रमपि प्रकाश्यते। श्रीनारायणदासमहाराजानां कृपा प्रसादस्यायं विशेषोऽस्ति यदेते धर्मगुरवस्तु सन्त्येव, किन्तु लोकहिताय परोलक्षमुद्राव्ययं परःकोटिमुद्राव्ययं वा कारयित्वा बहुषु नगरेषु, ग्रामेषूपनगरेषु वा एतैः शिक्षणालया अस्थाप्यन्त, चिकित्सालयाश्चास्थाप्यन्त। जयपुरे राजस्थानशासन-प्रेरणया यज्जगद्गुरुरामानन्दाचार्य-राजस्थानसंस्कृत-विश्वविद्यालयाख्यं प्रतिष्ठितं शिक्षा-संस्थानं प्रवर्तितमभूत् तस्मिन् समस्ताया भवननिर्माणव्यवस्थाया अधिकतरो व्ययभारः प्रथमत एतैरेव निर्व्यूढोऽभूदत एतेषां यशः संस्कृतजगत्यपि प्रससार।

एतेषां ''सन्तशिरोमणीनां'' चरित्रवर्णनाय, यशोगाथाऽभिलेखनाय च राजस्थानस्य सुप्रथितेन, अनेकमहाकाव्यप्रणयनलब्धयशसा प्रो. डॉ. रामदेव-साहूवर्येण 142 पद्येषु ''श्रीमन्नारायणयशोविजया'' ख्यं यत् काव्यमलेखि तस्य सम्पादनप्रकाशनादिकार्येषु श्रीदादूसंस्कृत महाविद्यालयस्योत्साहिना प्रधानाचार्येण डॉ. सुरेन्द्रकुमारशर्मणा प्रेरितया तस्य महाविद्यालयस्य दर्शनविभागाध्यक्षया श्रीमत्या अंजनाशर्मवर्यया प्रत्तेन सहकारेण तस्य प्रकाशनं महाविद्यालयेनानेन कृतमस्ति।

अस्मिन् काव्ये वसन्ततिलकासु सन्तनारायणदासानां जीवनं कृतित्वं च कविना वर्णितमस्ति। प्रारम्भे पाठकानां परिचयाय श्रीरामानन्दाचार्याणां प्रमुखशिष्याणां द्वाराचार्याणां स्तवादयोऽपि मुद्रिताः, संक्षिप्य हिन्द्यां श्रीनारायणदासमहाराजानां त्रिवेणीधाम्नश्च परिचयादिक-मपि मुद्रितम्।

श्रीदादूमहाविद्यालयेऽचिरात् पुनर्जागृतायां प्रकाशनपरम्परायामिदं प्रकाशनमप्यभिनन्दनार्हम्। प्रकाशनपरम्परायाः कृते सम्पूर्णोत्साहेन प्रवृत्तः प्रधानाचार्यवर्यः डॉ. सुरेन्द्रकुमार शर्मा, तस्य सर्वे सहयोगिनश्चाप्यभिनन्दनार्हाः।

**श्रीमन्नारायणयशोविजयम्ः** रचनाकारः - डॉ. रामदेव साहू श्रीमती अंजना शर्मा, सम्पादकः - डॉ. सुरेन्द्रकुमार-शर्मा प्रकाः शोध एवं प्रकाशन विभाग, श्री दादू संस्कृतमहाविद्यालय, मोती डूँगरी, जयपुर - पृ.सं.-60.

## श्रीदुर्गासप्तशत्याः विशालं सचित्रं संस्करणम्

श्रीदुर्गादेव्याः उपासना भारते एव न अपितु विश्वस्य अनेकेषु देशेषु अनेकेभ्यः वर्षेभ्यः क्रियते। प्राचीनतमा खलु परम्परा शक्त्यर्चनायाः। शाक्तोपासनायाः सर्वाधिकः प्रचलितः आधारग्रन्थः दुर्गासप्तशतीति राजते यश्च मार्कण्डेयपुराणस्य फलमस्ति, यस्मिन् त्रयोदशसु अध्यायेषु श्लोकानां सप्तसु शतेषु च शक्तेः विविधरूपाणां विवरणात्मकवर्णनं चकास्ति। शाक्तोपासकानां तु सञ्जीवनी दुर्गासप्तशत्येवास्ति यस्याः अर्चनं पठनञ्चानुदिनं चरीक्रियते। अनेकासु भाषासु अनूदितेयम्, अनेकाः टीकाः उपलभ्यन्ते, पाठविधयः गृहेषु प्राप्यन्ते च। किन्तु विश्वे प्रथमोऽयमवसरः यदस्य ग्रन्थस्य सुविशालं चमत्कारिचित्रमालिकायुतं हिन्द्याङ्ग्लानुवादसहितं रोमनलिप्यां लिप्यन्तरितञ्च स्वरूपं साम्प्रतमेवागतं- **श्रीदुर्गासप्तशतीः एन इलेस्ट्रेटेड बुक ऑफ द ग्लोरी ऑफ द गोडेस** इति नाम्ना सपद्येव प्रकाशतामागतमिदं यत् हृदयहारिसंस्करणं यत् साधकेभ्यः नूत्नतत्त्वप्रदानेन सह नूत्नमार्गमपि प्रददाति।

जयपुरस्य ''नित्यम् पब्लिकेशन्'' इत्यनेन प्रकाशिता डॉ. संदीपजोशीत्याख्येन सम्पादिता च श्रीदुर्गासप्तशती। अस्याः विशेषः प्रथममेव पाठकान् चमत्करोति कर्षति च हृदयम्। अस्याम् अनुवादेन सह देशेषु लब्धप्रतिष्ठचित्रकर्तृभिः विविधासु शैलीषु प्रतिपृष्ठं विपुलसंख्यायां मुद्रितानि यानि रचितानि चित्राणि तस्याः कथायाश्चरितं वर्णनञ्च प्रकटीकुर्वन्ति। तंजोर-मालवा-कांगडा-जयपुर-बीकानेर इत्यादि 575 रङ्गरञ्जितचित्र-शैलीनां प्रभावेण सा घटना कथाचरितञ्च स्फुटीकरोति आत्मानम्।

अनेन साधकमनसि तत्स्वरूपं तदाख्यानञ्च सुतराम् आविर्भवति। चित्रमेवास्य संस्करणस्य प्रमुखविशेषः।

एतदतिरिक्तम् अस्यां प्रत्येकं श्लोकस्य रोमनलिप्यां लिप्यन्तरीकरणेन देवनागरीलिपेः अपरिचितपाठकाय पाठसौकर्यं सम्पादितम्। प्रत्येकं पद्येन सह अन्वय-पदच्छेद-पदार्थज्ञान-हिन्दीभाषान्तरण-आङ्ग्लभाषा-न्तरणमपि विद्यते।

एवञ्च प्रतिपृष्ठं श्लोकः तस्य चित्रं यत्तस्य भावे स्थितं सहैव पूर्णतः विशुद्धः उत्कृष्टहिन्द्याङ्ग्लानुवादश्च संस्करणस्यास्य विशेषः।

एतदतिरिक्तं पूजाविधिः, पाठविधिः, नवार्णविधिः, अर्गला, कीलकं, रहस्यं, कुञ्जिकेत्यादयश्चापि लिप्यन्तरणहिन्द्याङ्ग्लभाषानुवादसहिता मुद्रिताः ये शाक्तोपासनायां प्रसिद्धाः वर्त्तन्ते। सप्तशत्याः अस्य विशालसंस्करणस्य इदमेवोद्देश्यमस्ति यत् विश्वस्य कस्यापि स्थानस्य साधकः ग्रन्थमाधारीकृत्य अर्थबोधपुरस्सरं स्वरूपध्यानं सम्यक्तया कर्तुं शक्नुयात्।

ग्रन्थस्यास्य सम्पादनं प्रणयनं प्रकाशनं व्यवस्थापन-मित्यादि च चमत्कारयुतं कृतं डॉ. सन्दीपजोशीत्याख्येन। अयं जगद्गुरुरामानन्दाचार्यराजस्थानसंस्कृतविश्व-विद्यालयस्य अनुसन्धानकेन्द्रे सहायकाचार्यपदमल-ङ्करोति, दुर्लभग्रन्थानां सचित्रानुवादप्रकाशनानुभवी च, यतोहि भारतीयाश्वशास्त्रसम्बद्धप्राचीनग्रन्थः डॉ. सन्दीपजोशिना पूर्वमेव सम्पादितः यश्च अस्मादेव विश्वविद्यालयात् प्रकाशतां गतः यस्य प्रसारः न केवलं देशे अपितु विदेशेऽपि वरीवृतीतीति।

दुर्गासप्तशत्याः विशालसंस्करणस्य चिरस्मरणीयं लोकार्पणं 21 जनवरी, 2016 इति दिनाङ्के देशस्य प्रधानमन्त्रिश्रीनरेन्द्रमोदिमहोदयेन स्वकार्यालये (7 आर सी आर स्थाने) कृतम्।

श्रीमोदिना प्रशंसितोऽयं प्रयासः । यस्य वार्त्ता संस्कृतजगति समाचारपत्रेषु समाचारचैनलेत्यादिषु च दृष्टा। उपासकेभ्यः एव न अपितु सर्वेभ्यः धर्मप्राण-जनेभ्यः इदं संस्करणं नूतनचेतनां प्रचारयिष्यतीति स्पष्टमेव।

**श्रीदुर्गासप्तशतीः** एन इलस्ट्रेटेड बुक ऑफ ग्लोरी ऑफ द गॉडेसः सम्पादकः डॉ. सन्दीप जोशी प्रका. नित्यम् पब्लिकेशन, जयपुर। पृ.सं. 816 मू. 31000/-.

# रक्तबीजः

❑ ऋषिराजजानी

दुर्गायाः विह्वलता अधुना पराकाष्ठां गता। प्रातःकालादारभ्य इदानीं पर्यन्तं सा आपणिकाय दूरभाषेण द्विवारम् अपृच्छत् यत् तस्याः क्रीतं शैत्यकं (Refrigerator) कदा आगमिष्यतीति। आपणिकेन सप्तवादनस्य कालः कथितः तथापि अद्यापि शैत्यकं न प्राप्तम्। अधुना सार्धसप्तवादनं जातम्। सर्वाऽपि व्यवस्था कृता वर्तते। सखीभ्यः शीतपेयं, रसगोलकाः च समोसायुक्तः अल्पाहारः सज्जीकृतो वर्तते।

पुरातनं शैत्यकमपि समीचीनमेवासीत्। कुटुम्बे त्रय एव सदस्याः वर्तन्ते। अतः तेषां कृते पर्याप्तमासीत्। किन्तु सख्याः रेवत्याः गृहे चतुर्मासपूर्वं द्विद्वारमयं विशालं शैत्यकमागतम्। विशालं शैत्यकं दृष्ट्वा दुर्गायाः मनसि नवं विशालं द्विद्वारयुक्तं शैत्यकं क्रेतुं महतीच्छा जाता। दुर्गा मध्यमवर्गीये परिवारे अजायत। सा बाल्य-कालादारभ्य धनिकं पतिं, विशालं गृहं, सौविध्ययुक्तं जीवनम् ऐच्छत्। किन्तु भाग्येन यद् निर्धारितं तदेव सा प्राप्नोत्।

महेश एकस्मिन् लघुकार्यालये लिपिक आसीत्। यद्यपि लघुके वेतनेऽपि महेशः दुर्गायाः सर्वेच्छां पूरयितुं प्रायतत। किन्तु दुर्गाया इच्छाः अनन्ताः। दुर्गा लघ्वीनाम् इच्छानां कृते हठाग्रहमकरोत्। लिपिकस्य लघुवेतनेन सर्वाः मनोरथाः पूरयितुं न शक्याः। तथापि महेशः वित्तकोषात् ऋणदानं (Loan) गृहीत्वा, भविष्यनिधेर्धनं प्राप्य वा मित्रेभ्यः ऋणं स्वीकृत्य दुर्गायाः महतीच्छानां पूर्तिमकरोत्।

तत्रान्तरे दुर्गायाः पुत्रो राहुलो गृहं क्रीडन् प्राविशत्। स गृहे उपद्रवं कर्तुं प्रारभत। दुर्गा एकतः व्याकुला आसीत्, अन्यतः राहुलस्य उपद्रवः। सा उच्चैः आक्रोशत् 'दुष्टबालक ! अहं वारं वारं कथयामि तथापि त्वं न शृणोषि। त्वं कुचेष्टां करोषि। तिष्ठ !' इत्युक्त्वा सा तं ताडयितुमधावत्। महेशः शीघ्रं तत्र उपस्थितो भूत्वा दुर्गां न्यवारयत्।

महेशः राहुलं सान्त्वयित्वा तम् अपरं कक्षम् अनयत्। बालकस्य मनः अन्यत्र नेतुं स कथामारभत ''पुत्रक ! अहं ते कथां कथयामि। शृणु, पुरातनकाले एकः राक्षसः आसीत्। तस्य नाम रक्तबीज आसीत्। रक्तबीजस्य गात्रात् यदा रुधिरबिन्दवः भुवि अपतन् तदा नवाः नवाः राक्षसाः अजायन्त।'' राहुलः साश्चर्यमपृच्छत्- 'किं तस्य रक्तबिन्दुभ्यः नवाः राक्षसा भवन्ति स्म?' महेशः पुनरपि कथामारभत ''अथ किं ! राक्षसो दुर्जेयः जातः। सः स्वर्गम् अजयत्। सर्वे देवाः स्वर्गात् निराकृताः दुर्गादेव्याः प्रार्थनामकुर्वन्। दुर्गादेवी कालिकायाः रूपं धृत्वा रक्तबीजस्य रुधिरपानमकरोत्। रक्तबीजस्य रुधिरबिन्दवः भूवि न अपतन् अतो नवा राक्षसा अपि न अजायन्त। अन्ततो राक्षसस्य रुधिरक्षयो जातः । स अम्रियत। देवाः स्वर्गं पुनः प्राप्य हर्षिता जाताः।''

तदैव द्वारशब्दो जातः। त्रयः श्रमिकाः आगत्य पाकशालायां शैत्यकं स्थापयन्ति स्म। सहसैव रेवती-कृपा-सलोनी-नमिता-राधा इत्यादयः प्रतिनिवेशिन्यः गृहं प्रविष्टाः। दुर्गा सर्वाभ्यः द्विद्वारयुक्तं नवीनं विशालं शैत्यकं सर्वकोणतः अदर्शयत्। सर्वाः सख्यः उपविष्टाः। दुर्गा अल्पाहारम् अददात्। सर्वाः शैत्यकस्य प्रशंसाम् अकुर्वन्। गृहान् निर्गच्छन्ती रेवती प्राह, 'दुर्गे ! अधुना त्वं नवं दूरदर्शनयन्त्रं क्रीणीहि। नवेन 'एल.इ.डी.' दूरदर्शनयन्त्रेण तव मुख्यकक्षस्य शोभावृद्धिर्भविष्यति।' सर्वाः गताः। दुर्गा क्षणवारं मुख्यकक्षे स्थित्वा दूरदर्शनस्य स्थानम् अपश्यत्। महेशः दुर्गायाः मनसि पुनर्जायमानं रक्तबीजमपश्यत्।

8, राजतिलक बंगलोज, बोपल, अहमदाबाद-380058

श्रीमतां बाबासाहेबआप्टे महोदयानां व्यक्तित्ववर्णने-

# विंशतितमः प्रसङ्गः

❑ वेणीमाधव गो. धर्माधिकारी

## तेषां प्रभावेणैव मुस्लिमत्वात्सत्यहिन्दुत्वमङ्गीकृतम्-

घोलका (अहमदाबाद) क्षेत्रस्य कापडिया-परिवारगताः श्रीकान्तिलालमाणिकलालमहोदयाः वर्णयन्ति-बाबामहोदयानां जीवनस्य वर्णनं तु किमहं करवाणि तेषां संस्मरणरूपे स्वस्यैव जीवनस्य दिशापरिवर्तनं वर्णयामि। कारणं मुस्लिममतावलम्बित्वेऽपि मयि तेषां तेजस्विविचाराणामेतादृशः प्रभावः संवृत्तः, यदहं मूलधर्मे हिन्दुत्वे परावृत्त्यागतः। एवं तैर्मदीयजीवनपरिवर्त्तने महान् सहयोगः कृतः।

वार्त्तेयं 1946 ई. वर्षस्यास्ति। कर्णावत्त्यां संघशिक्षावर्गो विधिविद्यालयस्य प्राङ्गणे प्रारब्ध आसीत्। मम नाम वेशभूषा च हिन्दुरूपैवासीत्। अस्मिन् संघशिक्षावर्गे अहमपि शिक्षार्थी आसम्। अथापि तं समयं यावदहं मनसा विचारेण च दृढो मुस्लिमधर्मानुयाय्येवासम्। वर्गेऽस्मिन् बाबामहोदयानामागमनमभूत्। दिनत्रयं यावत्तेषां हिन्दुसंस्कृतिविषये भाषणमभूत्। तेषामेतान् त्रीन् प्रवचनान् श्रुत्वा मम तु नेत्रोन्मीलनमिव संजातम्। तेषां प्रवचनानां पूर्णं विवरणं तु प्रदर्शयितुमसंभवमेव। तैः हिन्दुसंस्कृतेरुदारतायाः विशालतायाश्चातिसुन्दरं विवेचनं कृतम्। तैः कथितमियं हिन्दुसंस्कृतेरेव विशेषता यदस्यां परमात्मन उपासनायाः विविधा मार्गाः सन्ति तथा च बहवोऽन्येऽप्यस्यां स्वीकर्तुं शक्यन्ते। एकं सद्विप्रा बहुधा वदन्ति इतिघोषणां कृत्वा विभिन्नानामुपासना-पद्धतीनामेकत्र सत्कारपूर्वकं समन्वयमार्गः प्रदर्शितः। अस्यां दृष्टौ मुख्योऽस्ति मानवस्यासीम आध्यात्मिको विकासः। विश्वस्यान्येषु मतेषु केवलमेकमेव पेगम्बरं वा दूतं वा स्वीकर्तुमाग्रहः। सोऽपीयदधिकसीमायामेवं कथयित्वा यदेवं कृते खुदा वा गाडो वा नैव मिलिष्यति प्रत्युत नरके पतनं भविष्यति। मानवविकासो दुराग्रहपूर्वकमवरुद्धः। अस्यां स्थितौ विशालं सुन्दरं च हिन्दुधर्मं संस्कृतिं च त्यक्त्वा केनापि हिन्दुना बाह्याधर्मान्प्रति गमनस्य कारणमेव नास्ति।

श्रीबाबामहोदयानामेतां वाणीं श्रुत्वा मम तु मनसि झंझावात एकः समुत्पन्नः व्याकुलता च समुत्पन्ना। अहं स्वं प्रत्यवलोकयम्, मम नाम हिन्दुसदृशम्, मम पितृपितामहप्रपितामहानां नामानि हिन्दुसदृशानि, मम वेशभूषा, आचारश्च सर्वं हिन्दुसदृशम्। परमहं हृदयेन दृढो मुस्लिममतानुयायी। अन्ततोऽहमेवं किमर्थं करोमि। एवं भासते स्म केनाप्यहं भागद्वये विभक्तः,

खण्डितोऽहं बहिरन्तश्च पृथक् पृथक्। किं मम कृते श्रेष्ठमिदं शोभाजनकमिदम्। मम मनः अन्तरेवान्तरे चीत्कारमकरोत्। दिनत्रयं यावद् बाबामहोदयानां भाषणश्रवणाभ्यन्तराले मम मनस्येका पीडा समुत्पन्ना। एक एव प्रश्नः किमहं योग्यमार्गस्थः अयोग्यमार्गे वा। ममाभ्यन्तरे विचारोऽयं सततं भ्रमन्नासीत्। पुनश्च किं करवाणि, बाह्याभ्यन्तरतो एकरूपः कथं भवेयम्? समस्यानामेतेभ्यो जालेभ्यो निस्सरणस्य मार्गः कः? एतादृशा अनेके प्रश्नाः मां व्याकुलयन्ति स्म। इतोऽप्यधिकं रात्रेर्निद्रापि विलुप्ता। विचाराणामेतयो-रावर्त्तनप्रत्यावर्त्तनयोरप्येको दीर्घतम इतिहासः। तं विस्तृतरूपेण प्रकटीकरणमपि श्रीबाबामहोदयानां विचार प्रभावस्य गरिमावबोधने सहायकं भविष्यति।

क्रमशः...

**218, धर्माधिकारिभवनं, ब्रह्मपुरी, जयपुरम्**

---

**प्रेरकप्रसङ्गशतकम्**

**एकचत्वारिंशःप्रसङ्गः**

# रत्नपरीक्षणम्

❑ **मा. श्रीमती आराधना धर्माधिकारी**

यूनानदेशस्यैकस्मिन् ग्रामे वसति स्म एको दीनो बालकः। यो हि प्रतिदिनं वनं गत्वा काष्ठानि छित्त्वा, काष्ठभारं सुबद्धं विधाय विपण्यां विक्रीय स्व जीवन-यापनं करोति स्म। एकस्मिन् दिने एको विद्वान् विपणितो गच्छन्नासीत्। सोऽपश्यद् यदस्य काष्ठभारः कलात्मकेन विधिना सुबद्धोऽस्ति। स बालकम-पृच्छत्-किं भारोऽयं त्वयैव सुबद्धः? बालकः प्रत्युत्तरमदात्-आम्, श्रीमन्नहमेव प्रतिदिनं वनं गत्वा काष्ठानि यावद्दिनं छित्त्वा भारमिमं सुबद्धं कृत्वा सायं विपण्यां विक्रीणामि। सः विद्वान् अवदत्-किं त्वमेनमुद्धाट्य पुनरेवमेव सुबद्धं कृत्वा बध्नातुं शक्नोषि? एतच्छ्रुत्वा बालकस्त्वरितमेव तमुद्धाट्य मनोहरेण प्रकारेण पुनस्तथैवाबध्नात्। तदा स विद्वान् पुनरवदत्-किं त्वं मया सह चलितुं शक्नोषि? अहं त्वां विद्याध्ययनं कारयिष्ये। तदर्थं सर्वं व्ययभारं सहिष्ये तव सर्वां व्यवस्थां करिष्ये। बालक स्तेन सह गतः।

स विद्वान् बालकस्यावासस्य, शिक्षायाः, भोजनादेश्च सर्वां व्यवस्थां चकार। स स्वयमपि तं पाठयति स्म। स्वल्पे एव समये स बालकः स्वकुशाग्र-बुद्धिबलेन उच्चशिक्षामप्यात्मसात्कृतवान्। अग्रे स एव बालकः यूनानदेशस्य प्रसिद्धो दार्शनिकः पाइयोगोरस नाम्ना प्रसिद्धः। स श्रेष्ठपुरुषो येन तस्याभ्यन्तरे महा-पुरुषत्वस्य बीजमवलोक्य तत् पल्लवितं कृतं स आसीद् यूनानदेशस्य विख्यातस्तत्त्वज्ञानी डेमोक्रीट्स नामा।

# राजस्थानीय-रचनाधर्मितायां ज्योतिर्विज्ञानस्य स्थापनम्

❑ डॉ. एस.एन. झा

राजस्थानीय-रचनाधर्मितायां ज्योतिर्विज्ञानस्य ग्रन्थरचनोपक्रम: प्रायेण षष्ठशताब्द्या आरभ्यावलोक्यते। आचार्यो ब्रह्मगुप्त: अत्रत्य: प्राचीनतमो ज्योतिर्विदस्ति येन ब्राह्मस्फुटसिद्धान्तस्य रचना विहिता आसीत्। अस्य ब्रह्मगुप्तस्य काल: शकाब्दस्य षष्ठी शताब्दी मन्यते अतएव ज्योतिर्विज्ञानमधिकृत्य ग्रन्थलेखनपरम्पराया: प्रारम्भस्य इदमेव प्रमाणम् अस्माकं समक्षं विद्यते। ब्रह्मगुप्तेनानेन सिद्धान्तग्रन्थस्य रचनां कृत्वा ज्योतिषशास्त्रस्य प्रथमस्कन्धस्य सिद्धान्तस्कन्धस्य प्रणयनं विहितम्। सिद्धान्तमधिकृत्य ग्रन्थरचनाकारा: प्रायेण न्यूना एव भवन्ति, यतो हि गणितशास्त्रे न भवति नैसर्गिकी प्रवृत्ति: यस्य कस्यचित्। किञ्चानेन क्षेत्रेऽस्मिन् स्वीयं पाटवं प्रदर्शितम्। अत: परवर्तिभिरनेकै: प्रख्यातज्योतिर्विद्भिरस्यानुसरणं कृतम्।

सिद्धान्तग्रन्थपरम्परायां राजस्थानीयविद्वत्सु वेदाङ्गमुनिना सिद्धान्तविवेकग्रन्थस्य रचना विहिता। अत्रापि ग्रहगतिनिर्णयस्य सिद्धान्तानां प्रतिपादनं गणितीयाधारेण विहितम्। अनेनापि ज्योतिर्विज्ञानस्य ग्रन्थरचनापरम्परा पर्याप्तं समृद्धा सञ्जाता। कालान्तरे इमामेव परम्परां मग्रेसारयन् जयपत्तनीयो विद्वान् पं. जगन्नाथसम्राट् अपि सम्राट्सिद्धान्त इति नाम्ना सिद्धान्तकौस्तुभ इति नाम्ना च ग्रन्थद्वयं रचितवान्। सम्राट्महोदयस्य इमावुभौ ग्रन्थौ दृग्गणितीयाधारेण ग्रहाणां स्थितिगत्योर्निर्धारणाय महत्त्वपूर्णौ मन्येते। तदनन्तरं जयपत्तनीयेनैव विदुषा जयरामभट्टेन दृग्गणितम् इति नाम्ना सिद्धान्तग्रन्थस्य रचना कृता या गणितीयप्रक्रियाया: सूत्राणि प्रस्तौति। तत्पश्चादस्मिन्नेव क्रमे वैद्यानाथसूरिणाऽपि ज्योत्पत्तिसार इत्याख्यो ग्रन्थो विरचित:। अयमपि ग्रन्थो गणितशास्त्राधारित एव। विंश्यां शताब्द्यामपि सिद्धान्तज्योतिषक्षेत्रे ग्रन्थरचनापरम्परा पर्याप्तं प्रसृता। तदन्तर्गतमपि सिद्धान्तस्कन्धमाश्रित्य ग्रन्थरचनायां राजस्थानीयज्योतिर्विज्ञानां प्रवृत्तिरवलोक्यते। श्रीकृष्णभट्टतैलङ्गविरचितं सिद्धान्तपञ्चकं विंश्या: शताब्द्या रचनासु उल्लेखनीयमस्ति। तदनन्तरं पण्डितदुर्गाप्रसादद्विवेदि-विरचिता सूर्यसिद्धान्तपरीक्षाऽपि महत्त्वपूर्णा रचना वर्तते। दृग्गणितीयाधारेण वेधादिलब्धनिष्कर्षानुसारेण च विदुषाऽनेन सूर्यसिद्धान्तस्य वस्तुत: परीक्षणं कृतावस्था कृतमस्ति। एवं विंशीं शताब्दीं यावत् सिद्धान्तज्योतिषस्य मर्मज्ञा विद्वांस: राजस्थाने बभूवु:।

संहिताग्रन्थानां सर्जनस्य परम्पराया: प्रारम्भो राजस्थाने पुण्डरीकभट्टस्य समयात् स्वीकर्त्तुं शक्यते। पुण्डरीकभट्टविरचिता लक्षणचन्द्रिका खगोलीयभूगोलीयलक्षणाधारेण भविष्यत्कालिकघटनानां ज्ञानाय वस्तुतोऽद्भुतो ग्रन्थोऽस्ति। अत्र लक्षणाध्यायानां योजना सप्तविंशतिरस्ति। विदुषा लेखकेन बृहत्संहिताया: शैली अत्रोदाहृता। तत्पश्चन् महाराजा रायसिंहस्य ज्योतिषरत्नाकर: अपि संहिताग्रन्थानां श्रेण्यां स्वीयं महत्त्वपूर्णं स्थानमादत्ते। अस्मिन् ग्रन्थे यद्यपि मुहूर्त्तप्रश्नादिविषया अपि वर्तन्ते तथापि मुख्यविषया: ग्रहचारादयो वर्तन्ते अतएवास्य संहिताग्रन्थस्वीकारे नास्ति कस्यापि विप्रतिपत्ति:।

विंश्यां शताब्द्यां पं. मधुसूदन-ओझामहोदयेन विरचित: 'ज्योतिषचक्रधर:' इत्याख्यो ग्रन्थोऽपि संहिताग्रन्थपरम्पराया एव संवाहकोऽस्ति। अस्मिन् ग्रन्थे विषयवैविध्यं स्फुटमस्ति। पञ्चखण्डात्मकेऽस्मिन् ग्रन्थे संहितोक्तविषयाणामेव प्रस्तुतिर्वैपुल्येन दृश्यते। तत्पश्चात् अजीजमुहम्मदविरचिता जयसिंहकारिकाऽपि उल्लेखनीयाऽस्ति। अस्यां लक्षणग्रन्थपरम्परायां कारिकाणां रचनां कृत्वा विदुषा ग्रहनक्षत्रयो: स्थितिविशेषाद्भविष्यत्कालिकघटनानां कथनं कृतमस्ति।

रत्नाकरपुण्डरीकस्य नक्षत्रज्योतिषम् अपि संहिताग्रन्थो वर्तते। अत्र नक्षत्राणां उदयास्तकालिकस्थित्याधारेण

भाविघटनानामुपक्रमो दर्शितः। अपि च गर्भलक्षणादि-विषयाणामपि तारकोदयास्तकालेन प्रभावः प्रदर्शितः। नक्षत्रविशेषे वातसंचारादिलक्षणपूर्वकम् फलमपि विज्ञापितमस्ति। अतएवास्य ग्रन्थस्योपयोगिता प्राक्तन-ग्रन्थानामिव सविशेषोपलक्ष्यते। पं. दुर्गाप्रसादद्विवेद-विरचितः संग्रहशिरोमणि ग्रन्थोऽपि इमां परम्परां निर्वहति।

संहिताग्रन्थानां सिद्धान्तग्रन्थानां च परम्परेव राजस्थाने जातकग्रन्थरचनाया अपि परम्परा स्फुटतया समवलोक्यते। जातकग्रन्थेषु भीमानन्दराजज्योतिषीकृतो जातकादर्श इत्यारगो ग्रन्थो प्राथमिकोऽस्ति। इतःपूर्वकालिकी न काऽपि जातकग्रन्थरचना अस्माभिरवलोकिता। तत्पश्चात् रोहिलार्द्धि हरिश्चन्द्रविरचिता ग्रहदीपिकाऽपि जातक-ग्रन्थश्रेण्यामुल्लेखनीया रचनाऽस्ति। दैवज्ञसोमदेवविरचिता गोचरचन्द्रिकाऽपि जातकानां गोचरीयफलादेशविज्ञापनाय महत्त्वपूर्णो ग्रन्थो वर्तते।

नारायणभट्टविरचितो 'ज्योतिषशास्त्रार्थसंग्रहः' इत्याख्यो ग्रन्थो राजस्थानीय विदुषां जातकग्रन्थेषु सर्वाधिकं विपुलोऽस्ति। अयं ग्रन्थः प्रतिपाद्यानुक्रमेण ब्रहज्जातक-मनुसरति। पं. दुर्गाप्रसादद्विवेदचिरचितं जैमिनिपद्यामृतम् जैमिनीयसूत्रानुसारं जातकानां फलविज्ञापनपद्धतिमाश्रित्य प्रवर्तते। अत्र विदुषा स्वोपज्ञफलार्थनिर्णयाय अन्यतरा पद्धतिरपि समाहिता। येनास्य ग्रन्थस्य मौलिकता स्पष्टीभवति। पं. सीतारामभट्टपर्वणीकरेणापि जातकग्रन्थ-परम्परायां 'जातकपद्धतिः' इत्याख्या रचना विहिता। विंश्याः शताब्द्या उत्तरार्द्धेऽपि पं. शिवरामकौण्डिन्य-विरचितः ज्योतिषतत्त्वप्रकाशः, पं. कल्याणदत्तशर्मणा लिखितो ज्योतिषपीयूषश्चोल्लेखनीयौ ग्रन्थौ वर्तेते।

मुहूर्त्तग्रन्थानां रचनापरम्पराऽपि राजस्थानीये ज्योति-र्विज्ञानवाङ्मये समुपलब्धा भवति। अत्र महाराज-रायसिंहविरचिता ज्योतिषरत्नमाला आद्या रचनाऽस्ति यस्यां मुहूर्त्तबोधाय कालनिर्देशस्य सम्यगौचित्यं संसाधितमस्ति। रोहिलर्द्धि हरिश्चन्द्रविरचितं भद्राकौतुकमपि मुहूर्त्तज्ञानाय पर्याप्तमुपादेयमस्ति। भद्रानिर्णयपूर्वकं मुहूर्त्तकाले भद्रायाः प्रभावः कदा स्यात् कदा च न स्यादिति निर्देशा अत्र प्रतिमुहूर्तं प्रतिपादिताः सन्ति। विंश्यां शताब्द्याम् अलवरनिवासिना गणेशदैवज्ञेन विरचिता मुहूर्त्ततत्त्व-दीपिकाऽपि पर्याप्तं महत्त्वपूर्णाऽस्ति। फलितग्रन्थेषु तत्रत्येनैव विदुषा लालचन्देन लालचन्दीपद्धतिः इत्याख्यस्य ग्रन्थस्य रचना कृता। इयं रचना जातकमुहूर्त्तयोर्विषयं मिश्रितरूपेण प्रस्तौति।

ज्योतिषशास्त्रीयसर्जनधर्मितायां वास्तुविषयमधि-कृत्यापि राजस्थानीयज्योतिर्विदां रचना उपलभ्यन्ते। आचार्यमण्डनकृतो 'राजवल्लभः' 'वास्तुमण्डनम्' च आद्यग्रन्थौ स्तः। तत्पश्चात् यशोधरभट्टस्य 'अपराजितपृच्छा' ग्रन्थः सर्वाधिकं विपुलो लभ्यते। सम्प्रत्यप्ययमप्रकाशित एवास्ति। राजस्थानीये पुरातत्त्वविभागेऽस्य पाण्डुलिपिः सुरक्षिता वर्तते। एतदनन्तरं मानतुङ्गाचार्यविरचितः 'समराङ्गणसूत्रधारः' ग्रन्थोऽपि उल्लेखनीयोऽस्ति। अयं ग्रन्थो भोजविरचितात् 'समराङ्गणसूत्रधार' ग्रन्थात् पृथगस्ति। जयपुरीयेण विदुषा विद्याधरचक्रवर्तिनाऽपि 'वास्तुकलानिधिः' ग्रन्थस्य रचना कृता आसीत्, येन वास्तुग्रन्थपरम्पराया उत्कर्षो लक्ष्यते।

एवमुपरिप्रदत्तेन ऐतिह्येन इदं स्पष्टीभवति यद् राजस्थाने ज्योतिषग्रन्थानां रचनाया क्रमः षष्ठशताब्द्या आरभ्य विंशीं शताब्दीं यावत् नैरन्तर्येण विद्यमानः आसीत्। राजस्थानीयविदुषां इमा रचनाः ज्योतिर्विज्ञानस्येतिहासे उल्लेखनीयतां भजन्ते। तथाहि अद्यापि केन न स्मर्यते ब्रह्मगुप्तस्य नाम तदवदानञ्च? एवमेवायेषु आधुनिक-कालिकेषु ग्रन्थकारेषु पं. जगन्नाथसम्राट्-रत्नाकर-पुण्डीरक-मणिराम-दीक्षित-विद्याधरचक्रवर्त्ती-दुर्गाप्रसादद्विवेदिप्रभृतीन् को न जानाति? अमीषां सिद्धान्ता अद्यापि अधीयन्ते अध्याप्यन्ते च। खेदस्य तु अयं विषयोऽस्ति यदद्यापि विषयान्तरस्य विद्वांसोऽनया परम्परया अनभिज्ञा एव सन्ति।

**व्याख्याता**

**राज. महा. आ. सं. कॉलेज, जयपुर**

# धर्मशास्त्रं च स्मृतिपदवाच्यम्

❑ ममता गुप्ता

धर्मशब्दस्तु धृञ् धारणे धातोः मन् प्रत्यये कृते सति निष्पन्नो भवति। ध्रियते लोकः अनेन इति, धरति धारयति वा लोकम्, ध्रियते यः स धर्मः। धर्मः एकः ईदृशः व्यापकः शब्दः विद्यते, यः समक्षमागत एव कस्याश्चिद् जातेः अथवा समाजस्य इतिहासं तथा तस्य जीवनस्य भूमिकां प्रस्तोतुं समर्थो भवति। धर्मशब्दे जातिविशेषस्य सभ्यता, संस्कृतिः, आचाराः विचाराश्च, निवासादि-रीतयः परम्पराश्च, जीवनप्रणाल्याः प्रक्रिया, निदर्शनञ्च एते सर्वे विषयाः सन्निहिताः भवन्ति। धर्मस्य परिभाषाऽपि अस्माकं दार्शनिकैः, चिन्तकैः, मनीषिभिश्च स्वस्वसमयस्य विचार-चिन्तानानुसारं विभिन्नै रूपैः प्रस्तुतीकृतास्ति। ''धारणाद् धर्म इत्याहुः'' धर्मस्य अस्यां व्युत्पत्तौ कर्म एव जीवनस्य मूलाधार उक्तः। अनेनैव मनुष्यः प्रेरणां प्रकाशञ्च लभते। धर्मस्य व्याख्या मनुस्मृतौ एवं कृता विद्यते-

**विद्वद्भिः सेवितः सद्भिर्नित्यमद्वेषरागिभिः।**
**हृदयेनाभ्यनुज्ञातो यो धर्मस्तं निबोधत।।( मनु. 2/1 )**

अर्थात् धार्मिकैः रागद्वेषविमुक्तैः मनीषिभिः नित्यं सेवितः तथा सत्वगुणप्रधानेन हृदयेन अनुज्ञातो धर्मोऽस्ति। धर्मस्य इदं सामान्यं लक्षणम्। ब्रह्मपुत्रः मनुः वेदमेव धर्मस्य मूलं स्वीकृतवान्-

**वेदोऽखिलो धर्ममूलं स्मृतिशीले च तद्विदाम्।**
**आचारश्चैव साधूनामात्मनस्तुष्टिरेव च।।( मनु. 2/6 )**

वेदो ऋग्यजुः सामाथर्वलक्षणः, स सर्वो विध्यर्थवादमन्त्रात्मा धर्ममूलं प्रमाणम्। अर्थवादानामपि विध्येकवाक्यतया स्तावकत्वेन धर्मे प्रामाण्यात्। यदाह जैमिनिः विधिनात्वेकवाक्यत्वात्स्तुत्यर्थेन विधीनां स्युः। मन्त्रार्थवादानामपि विधिवाक्यैकवाक्यतयैव धर्मे प्रामाण्यं, प्रयोगकाले चानुष्ठेयस्मारकत्वं, वेदस्य च धर्मे प्रामाण्यं यथार्थानुभवकरणत्वरूपं न्यायसिद्धम्। स्मृत्यादीनामपि तन्मूलत्वेनैव प्रामाण्यप्रतिपादनार्थ-मनूद्यते। मन्वादीनां च वेदविदां स्मृतिर्धर्मे प्रमाणम्। वेदविदामिति विशेषणोपादानाद्वेदमूलत्वेनैव स्मृत्यादीनां प्रामाण्यमभिमतम्। शीलं ब्रह्मण्यतादिरूपम्। तदाह हारीतः- ब्रह्मण्यता देवपितृभक्ता सौम्यता अपरोपतापिता अनसूयता मृदुता अपारुष्यं मित्रता प्रियवादित्वं कृतज्ञता शरण्यता कारुण्यं प्रशान्तिश्चेति त्रयोदशविधं शीलम्। गोविन्दराजस्तु - शीलं रागद्वेषपरित्याग इत्याह आचारः कम्बलवल्कलाद्याचरणरूपः साधूनां धार्मिकाणाम् आत्मतुष्टिवैकल्पिकपदार्थविषया धर्मे प्रमाणम्। तदाह गर्गः-वैकल्पिके आत्मतुष्टिः प्रमाणम्।

**यः कश्चित् कस्यचिद्धर्मो मनुना परिकीर्तितः।**
**स सर्वोऽभिहितो वेदे सर्वज्ञानमयो हि सः।।( मनु. 2/7 )**

मनुः धर्मलक्षणस्य स्वरूपं स्पष्टयन् कथयति-

**वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।**
**एतच्चतुर्विधं प्राहुः साक्षाद् धर्मस्य लक्षणम्।।**
**( मनु. 2/12 )**

अर्थात् वेदः, स्मृतिः, श्रेष्ठाचरणं, मनसः प्रसन्नता इमानि चत्वारि धर्मस्य साक्षात् लक्षणानि सन्ति। वेदस्य महत्तां प्रतिपादयन् मनुः वेदं सर्वेषां गतिमुक्तवान् तथा वेदार्थमज्ञातृणामयं वेदः शरणं तथा वेदार्थं ज्ञातृणामयं वेदः स्वर्गमोक्षदायकः अस्ति। मनुशब्दैः-

**अर्थकामेष्वसक्तानां धर्मज्ञानं विधीयते।**
**धर्मं जिज्ञासमानानां प्रमाणं परमं श्रुतिः।।**

अर्थात् ये पुरुषाः गोभूमिसुवर्णादिधनेषु, स्त्रीसम्भोगरूपे कामे च आसक्ताः न सन्ति, तेभ्य एव एतद्धर्मानुष्ठानस्योपदेशः प्रदीयते। ये धर्मविषयं धर्मस्य रहस्यं वा ज्ञातुमिच्छन्ति तेषां कृते वेद एव परमं प्रमाणम्।

जैमिनिः धर्मलक्षणवर्णनक्रमे कथयति ''**चोदना-लक्षणोऽर्थो धर्म**''। उभयं चोदनया लक्ष्यते, अर्थः श्रेयः साधनं ज्योतिष्टोमादिः अनर्थः प्रत्यवायसानं श्येनादिः। तत्र वेदप्रमाणकं श्रेयः साधनं ज्योतिष्टोमादिधर्म इति सूत्रार्थः।

महाभारते धर्मस्य स्वरूपं भीष्मेणोक्तम् –

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम्।**
**आत्मनः प्रतिकूलानि परेषां न समाचरेत्।।**

अर्थात् आत्मकल्याणानुरूपं विश्वस्य कल्याणं यत्र स्यात् स एव धर्मः। अन्यत्र ''धारणाद्धर्ममित्याहुः'' जीवने यो धार्यते, स एव धर्मः, किं जीवने धार्यते इति जिज्ञासायां मनुलिखितं धर्मस्य स्वरूपमेव वस्तुतो जीवने धार्यम्- आचारः परमो धर्मः। मनुष्यस्य शुभमाचरणं धर्मशब्देनोच्यते, पुनश्च-

**धृतिः-क्षमा-दमोऽस्तेयं शौचमिन्द्रियनिग्रहः।**
**धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम्।।**
**( मनु. 6/92 )**

अर्थात् धैर्यं, क्षमा, दमः, अस्तेयं, शौचम्, इन्द्रियाणां वशीकरणं, ज्ञानं, विद्या, सत्यं, क्रोधस्य त्यागः इमानि दशसंख्याकानि धर्मलक्षणानि प्रोक्तानि। यथा तिलेषु तैलं, दुग्धे घृतम्, प्राणेषु प्राणाः तथैव आध्यात्मिकजीवने धर्मोऽपि प्राणभूत इति केवलं पशुपक्षिप्रभृतयो धर्मेण रहिता इति सुप्रसिद्धम्। यथोक्तं हितोपदेशे –

**आहारनिद्राभयमैथुनं च सामान्यमेतत् पशुभिर्नराणाम्।**
**धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः।।**

वस्तुतस्तु आहारनिद्राभयमैथुनादिभिर्गुणैः पशुरपि संयुतो भवति, परन्तु पशुतो मनुष्यस्य विशेषता केवलं धर्मादेव भवति। अतो यदि धर्मेण हीनो मानवः स्यात्तर्हि नास्ति किंचित्तस्य वैशिष्ट्यं पशुभ्यः। उदाहरणस्वरूपं- महाभारताख्ययुद्धे धर्मेणाधर्मोपरि विजयो लब्धः, भगवता कृष्णेन धर्मस्योपदेशः कृतः पाण्डवैश्च तस्य पालनं कृतम्, अतस्तेषां दुःखानां विनाशोऽभवत्। तथा च दुर्योधनेनोक्तम्- जानामि धर्मं न च मे प्रवृत्तिः जानाम्यधर्मं न च मे निवृत्तिः। धर्मशास्त्रे धर्मस्य उपयोगिताप्रसंगे वर्णितमस्ति-

**धर्मं यो बाधते धर्मो न स धर्मः कुधर्म तत्।**
**अविरोधी तु यो धर्मः स धर्मः सत्यविक्रमः।**
**धर्मेण हन्यते व्याधिः धर्मेण हन्यते ग्रहः।**
**धर्मेण हन्यते शत्रुर्यतो धर्मस्ततो जयः।।**

अन्ततः समीक्षणे सति धर्माचरणमेव सुखस्य साधनं प्रतीयते। अयं धर्म एव जीवनस्य गतौ, विधौ, प्रगतौ च सहायको भवति। संसारे यावन्त एव धर्माः सन्ति तेषां स्वकीयं महत्त्वं सत्त्वञ्च विद्यते एव किन्तु हिन्दुधर्मस्य हिन्दुजातेश्च स्वकीया विशेषता, महत्ता, सत्ता सनातनकालाद् विद्यमानास्ति। अयं धर्मः अन्यसमस्तधर्माणां जातीनां च समादरकरणे सदैव अग्रणीः सञ्जातोऽस्ति। निष्कर्षतः किं कर्त्तव्यं, किं न कर्त्तव्यमिति विज्ञातुं मानवः स्वकर्म, स्वधर्मं, चतुर्भिः प्रकारैर्विजानीयात्। तद्यथा- (1) वेदवचनैः स्वधर्ममनुतिष्ठेत् (2) वेदसमाभिः, स्मृतिभिरनुकुर्यात् (3) श्रेष्ठजनाचारानुकूलैः सदाचारैर्धर्मानुष्ठानं धारेयत् (4) स्वात्मतुष्टये यो धर्मः प्रियः स्यात्, तमेव स्मृतिवचनानुसारं समाचरेत्। समष्टावेतान्येव धर्मस्रोतांसि, येन स्वकर्मनिर्णयो भवितुमर्हति।

सत्यं वद ! धर्मं चर ! इत्यादिश्रुतिवाक्यैर्मानवानां सकलकर्मोपदेशात्तेषां किं कर्मेति विवक्षायां धर्मशास्त्रानुकूलमेव कर्म कार्यमिति समाधीयते। यतोहि धर्मस्रोतांसि क्रमेण गर्भाधानादिजन्मसंस्कार-मारभ्यान्तिमसंस्कारपर्यन्तानि ब्रह्मचर्य-गार्हस्थ्य-वानप्रस्थ-संन्या-साश्रमाणां सर्वाणि कर्माण्युक्तानि सन्ति। धर्मशास्त्रं च स्मृतिपदवाच्यम्।

**शोधार्थिनी,**
**संस्कृत-विभाग, डॉ. भीमराव-अम्बेडकर-राजकीय स्नातकोत्तर-महाविद्यालयः, श्रीगंगानगरम् ( राज. )**

# भारतीमञ्जुनिकुञ्जम्

## ( पूर्वानुवृत्तम् )

❑ डॉ. रामनारायण झा

### समये गते पश्चात्तापः

चिन्तयत्सत्सतामीप्सितं सर्वदा–
कर्ण्य कर्णैः कथां कर्णपेयामतः।
मातरं रक्षिता साशु वेला गता,
हा कथं भारते भारती आहता।। २८४।।

दर्शलाभादिना हा गता जन्मदा,
शिष्यते रोदनं दुःखदावाद्रिदम्।
पृष्ठतो धिङ्न तं तन्मनः किं विना,
हा कथं भारते भारती आहता।। २८५।।

किल्विषं निष्कृतेः किन्न तत्कज्जलं,
प्रस्थितायां क्षणं यत् क्षणं मातरि।
तत्स्मृतं तं सुतं तर्हि दन्दह्यते,
आहता हा कथं भारती भारते।। २८६।।

भारता ! रे सुरायां रता भास्वरा,
सौरते हेम्नि हेमाननायां सुरा।
वीक्षणीयाक्षिभिः क्षामिका ते गिरा,
हा कथं भारते भारती आहता।। २८७।।

### समये गते रावणोक्त्युदाहृतेर्दर्शः

सौरभं हेम्नि कुर्यान्ततः श्रेणिकाः,
अम्भसाञ्चाम्बुधेस्साध्यमेतन्मया।
माधुरं स्वर्गयाता उताहं त्रयम्
आहता भारते भारती हा कथम्।। २८८।।

चामरम्मन्यमानो दशास्योऽदयी,
मर्शयञ्चालसः कालगेहं गतः,
भारतीं सेव मा भूर्हि सेवस्व मे
भारती हा कथम् आहता भारते।। २८९।।

दर्शशास्त्रावगाढेभगण्डस्थली–
दारशार्दूलसम्राडयं मे हृदि,
यस्तटस्थो गृहस्थो वनस्थः शमी,
हा कथम् आहता भारते भारती।। २९०।।

भामतीमानयं भाष्यभाषाग्रणी–
सिन्धुरायामपाणिभ्रमावर्तकः।
नाम वाचस्पतिर्यस्य वाचस्पतिः,
हा कथम् आहता भारते भारती।। २९१।।

सर्वदर्शार्णवान्तर्हिताम्भोजिनी,
मौक्तिकामोदसूर्याधिपाभ्रंलिहः
यो दवीयानिदानीं बुधानां हृदि,
हा कथम् आहता भारते भारती।। २९२।।

धर्मजायानभिज्ञोधिगेहं गृही,
भामतीलेखवेला निदर्शस्स सा।
योधिविश्वं सदैको विभूते रविः,
हा कथम् आहता भारते भारती।। २९२।।

**व्याख्याता ( संस्कृतम् )**
**राजकीयकल्याणमहाविद्यालयः, सीकरम्**

( संस्कृत समाचारः )

# डॉ. जया दवे संस्कृत अकादम्या आध्यक्ष्यं गृहीतवती




जयपुरम्, जुलाई। सन्तशिरोमणीनां श्रीमन्नारायणदासमहाराजानामाशीर्वादपूर्वकं डॉ. जया दवे राजस्थान संस्कृत अकादम्या आध्यक्ष्यं गृहीतवती। अस्मिन्नवसरे साध्वी प्रीतिः प्रियंवदा, शिक्षाराज्यमन्त्रिणः श्री वासुदेव देवनानी महोदयाः, संस्कृत विश्वविद्यालयस्य कुलपतयः डॉ. विनोदशास्त्रिणः सार्वजनिकप्रन्यासस्य सभापतिमहोदयाः श्रीमन्तः एस.डी. शर्माणोऽन्ये च बहवो गणमान्या अतिथयः उपस्थिता आसन्।

श्रद्धेयैः नारायणदासमहाराजैः संस्कृत-स्यावधानपूर्वकमाधिकारिकप्रचारप्रसारयोरावश्य-कता प्रतिपादिता। विद्वांसश्चैतदर्थं प्रतिबद्धा भवेयुरिति तैराह्वानं कृतम्। साध्वी प्रीतिः प्रियंवदा संस्कृतजगत आह्वानं कृतवती यद् वैदिकचर्चाणां श्रीमद्भगवद्गीता-दिधर्मग्रन्थोद्धरणपद्यानां च ज्ञानं भाविच्छात्रवर्गान् प्रदातुं विद्वांसो दायित्वं निर्वहन्त्विति।

डॉ. जया दवे ऽस्मिन्नवसरे आगन्तुकानां विदुषां गणमान्यातिथिभ्यो धन्यवादान् विज्ञापितवती। वैदिकज्ञाननिगूढार्थान् जनसामान्यं विज्ञापयितुं पौरोहित्यकर्मकाण्डयोः प्रायोगिक ज्ञानं पुनः प्रतिष्ठापयितुं च विद्वद्भ्यः आह्वानं कृतवती। देवस्थानविभागाधीन-मन्दिरेषु संस्कृत अकादम्याः सहयोगेन ज्योतिष- पौरोहित्यशिविराणि संचालयितुमपि एषा निर्दिष्टवती। उक्तवती च भाविनि काले संस्कृतस्य विकासाय प्रचारप्रसाराभ्याञ्च संस्कृत अकादमी द्वारा योजनाः निश्चिताः विधास्यन्ते।



# होराशास्त्रस्य वैशिष्ट्यम्

❑ डा. विजेन्द्रकुमारशर्मा

ज्योतिषशास्त्रस्य सिद्धान्त-संहिता-होरा इत्यादयः त्रयो भेदाः सन्ति। तेष्वेव मानवजीवने होरास्कन्धस्य बहु महत्त्वं विद्यते। अर्थात् कालवाचकस्य अहोरात्रशब्दस्य आद्यन्ताक्षरविलोपवशात् होराशब्दस्य निष्पत्तिर्भवति। यथोक्तम् वराहमिहिरेण- **''होरेत्यहोरात्रविकल्पमेके वाञ्छन्ति पूर्वापरवर्णलोपात्''**।'होरा' इत्यनेन लग्नस्य तथा राशेरर्धभागस्यापि ज्ञानं भवति। होरासंबधितं शास्त्रं होराशास्त्रशब्देन ज्ञायते। अस्मिन् होराशास्त्रे कस्यापि पुरुषस्य जन्मकुण्डलीं विनिर्माय द्वादशभावेषु राशिषु च ग्रहाणां स्थितिवशात् बलाबलज्ञानपूर्वकं दशान्तरदशा-ज्ञानञ्च कृत्वा सुख-दुःख-इष्टानिष्ट-उन्नत्यवनति-भाग्योदयादीनां मानवजीवने घटितघटनानां सर्वेषां पक्षाणां ज्ञानं विवेचनञ्च क्रियते। भट्टोत्पलः कथयति- **'प्रतिष्ठा-यात्राविवाहादीनां लग्नग्रहणेन च शुभाशुभफलं जगति यया निश्चीयते सा होरा।'**

जातकस्य जन्मकुण्डलीमाध्यमेन पूर्वजन्मनि कृतस्य प्रारब्धकर्मणश्चाधारेण जातकः अस्मिन् जन्मनि किं शुभाशुभफलम् अवाप्स्यतीति निरूप्यते। अतः शुभाशुभकर्मफलसूचकं शास्त्रं होराशास्त्रमिति। सिद्धान्तशिरोमणौ वासनाभाष्ये विहितं यत् प्रारब्धकर्म-प्रदर्शकं जातकशास्त्रम्। यथोक्तं-**'जातकशास्त्रं प्रारब्धकर्मविपाकव्यञ्जकम्।'**

**'अभिधेयं तु जगतः शुभाशुभनिरूपणम्'** इति महर्षिनारदोक्तवचनेन सिद्ध्यति यदस्य समस्तजगतः शुभाशुभनिरूपणमेव 'होरा' ज्योतिषशास्त्रस्य प्रयोजनमस्ति। मुख्यरूपेण मानवजीवनस्य पथप्रदर्शकं वर्तते होराशास्त्रम्। जन्मकुण्डलीमाधृत्य द्वादशभावानां शुभाशुभफलविवेचनमेव होराशास्त्रस्य प्रधान-विषयोऽस्ति। लग्नमाध्यमेन भावक्रमस्य द्वादशभावेषु विभाजनं क्रियते। तेषां ग्रहाणां शुभाशुभगुणानाम् आधारेण प्राणिनः शुभाशुभफलकथनं भवति। कुण्डली हि मानवस्य पूर्वजन्मार्जितानां कर्मणां मूर्त्तिमद् रूपं भवति। यथा विशालवटवृक्षस्य समावेशः तस्य बीजाङ्कुरे भवति तथैव प्रत्येकमानवस्य पूर्वजन्मान्तरे कृतकर्माणि जन्मकुण्डल्याम् अङ्कितानि तथैव होराशास्त्रं पूर्वजन्मार्जितकर्मणां फलानि प्रकटयति। यथोक्तं -

**यदुपचितमन्यजन्मनि शुभाशुभं तस्य कर्मणः पङ्क्तिम्।**
**व्यञ्जयति शास्त्रमेतत् तमसि द्रव्याणि दीप इव।।**

होराशास्त्रे जातकस्य शुभाशुभफलसम्बन्धिविचारः सूक्ष्मतया विधीयते। होराशास्त्रं जीवने प्रचलितस्य समस्तघटनाक्रमस्य यथार्थरूपेण ज्ञानं कारयति। यद्यपि ज्योतिषशास्त्रे मानवजीवनस्य विविधपक्षाणां ज्ञानार्थमनेके मार्गाः सन्ति तथापि यादृशं ज्ञानं होराशास्त्रेण भवति न तादृशम् अन्येन केनापि शास्त्रेण भवितुमर्हति। होराशास्त्रं दैवज्ञस्य सा दिव्यदृष्टिः भवति यया सः मानवमस्तकपटले विधात्रा लिखिताम् अक्षरमालिकां सुगमतया पठितुं शक्नोति। उक्तं च-

**विधात्रा लिखिता याऽसौ ललाटेऽक्षरमालिका।**
**दैवज्ञस्तां पठेद् व्यक्तं होरानिर्मलचक्षुषा।।**

होराशास्त्रमिदं मनुष्यस्य मस्तके लिखितभाग्य-लेखस्य प्रकाशनम् अन्धकारावृतसदनस्थितपटा-दिपदार्थप्रकाशनमिव करोति। जन्मकुण्डलीमाधारीकृत्य शुभाशुभदशान्तर्दशादीनां ज्ञानमवाप्य तदनुकूल-वाणिज्यादिकर्मणां शुभसमये यात्रायाः विद्यायाश्च

प्रारम्भेण धनादिकस्य मनोरथादेश्च सिद्धिः होराशास्त्रं ज्ञात्वैव भवितुं शक्यते।

होराशास्त्रमिदं मनुष्याणां धनार्जने साहाय्यं करोति, विपत्समुद्रे नौकावत् कार्यं करोति। इत्थं सम्पदि सहायकं, विपदि समुद्धारकं कृत्याकृत्यप्रवृत्तिनिवृत्ति-कारकं सर्वकल्याणञ्च जातकशास्त्रमपहाय नान्यत् किमपि लोकोपरकारकं शास्त्रं विद्यते यत् एतादृशं साहाय्यं कुर्यात्। यथोक्तं सारावल्यां कल्याणवर्मणा-

**अर्थार्जने सहायः पुरुषाणामापदर्णवे पोतः।**
**यात्रासमये मन्त्री जातकमपहाय नास्त्यपरः।।**

जगत्यस्मिन् यत्किञ्चिदपि शुभाशुभकर्म अस्माभिः क्रियते तत्सर्वं होराशास्त्राधीनमेवास्ति। यतो हि कृतस्य कर्मणः शुभाशुभव्यञ्जकमिदं शास्त्रं परिजायते। होराशास्त्रे यत्किञ्चिदपि फलं प्रतिपाद्यते तत्सर्वं पूर्वकृतकर्मणां परिपाकोऽस्ति। होराशास्त्रातिरिक्तं केनचिदन्येन शास्त्रेण कर्मणां विषये यथार्थज्ञानं न भवति। अतोऽस्य महत्त्वं स्वत एव सिद्ध्यति।

होराशास्त्रस्य मानवजीवने अत्यधिकं महत्वम् उपयोगित्वं च वर्तते। सर्वे जनाः स्वभविष्यं ज्ञातुं सततमिच्छन्ति। अस्मादेव कारणादस्य स्कन्धस्य सर्वाधिकरूपेण प्रचारो दृश्यते। स्कन्धोऽयं शिशोः जन्मकालादारभ्य मरणकालपर्यन्तं शुभाशुभफलं प्रकटयन् पिण्डब्रह्माण्डयोरखिलरहस्यजातं प्रकटी-करोति। यदि कश्चिद् दैवज्ञः कस्यचित् मानवस्य उचितप्रकारेण जन्मपत्रं निर्माति तेन सः तस्य जनस्य गुणान् प्रकृतिमपि जानाति। दैवज्ञाः जातकपत्रमवलोक्य तस्य जीवने सम्भाव्यघटनानां ज्ञानं पूर्वमेव प्राप्नुवन्ति। विधात्रातिरिक्तं कुशलदैवज्ञ एव एतत् कार्यं कर्तुं शक्नोति। ग्रहनक्षत्रादिकृद्दोषारिष्टफलप्रशमनार्थं ज्योतिषशास्त्रं भूतभविष्यवर्तमानकालिकघटनाक्रमस्य परिचयं ददाति मनुष्यं स्वकर्मानुष्ठातुं पौरुषं च साधनार्थं होराशास्त्रस्य वैशिष्ट्यं सार्वदेशिकं सार्वभौमिकं सार्वकालिकञ्चास्ति।

अस्मिन् होराशास्त्रे न केवलं ग्रहाणां शुभाशुभस्थितिवशात् मानवजीवनोपरि तेषां शुभाशुभप्रभावविवेचनमस्ति अपितु अशुभग्रहाणां निर्बलग्रहाणां वा शान्त्युपायाः अपि सम्यक्तया निरूपिताः सन्ति। निर्बलग्रहाणां शान्त्यर्थं मन्त्रप्रयोगः, रत्नधारणं, दानद्रव्याणि, औषधिस्नानम् इत्यादि उपायाः होराग्रन्थेषु प्राप्यन्ते। एवं भविष्ये सम्भावितघटनानां ज्ञानं कृत्वा मन्त्ररत्नधारणौषधिस्नानमित्याद्यनुष्ठानैः तेषां घटनानां निराकरणमपि होराशास्त्रेण क्रियते।

ज्योतिर्विद्भिः होराशास्त्रं पञ्चधा विभक्तमस्ति - जातकं, ताजिकं, रमलं, प्रश्नः, स्वप्नश्चेति। तेष्वपि सर्वातिशायित्वेन जातकस्यैव होराशास्त्रे प्राधान्यं वर्तते अतः होराशास्त्रं जातकशब्देनापि अभिधीयते। यथोक्तं कल्याणवर्मणा सारावल्यां-

**''जातकमिति प्रसिद्धं यल्लोके तदिह कीर्त्यते होरा।**
**अथवा दैवविमर्शनपर्यायः खल्वयं शब्दः।।''**

यत्र जन्मकालग्रहनक्षत्रतिथिराश्यादीन् आधारीकृत्य फलादेशः क्रियते तत्ताजिकम्। यत्र वर्षफलविचारः क्रियते तत्प्रश्नशास्त्रम्। स्वप्नविवेचनेन शुभाशुभफल-निरूपकं स्वप्नशास्त्रम्। एतेषु ताजिकरमलप्रश्नस्वप्नानां फलप्रतिपादनार्थं जन्मलग्नस्य आवश्यकता न भवति। एतेषां ग्रन्थाः अपि पृथग्रूपेण रचिताः। अतः जातक-शास्त्रमेव होराशास्त्रस्य मुख्याङ्गरूपेण परिकल्पितः।

**सहायकाचार्यः ( ज्योतिषविभागः )**
**राष्ट्रियसंस्कृतसंस्थानम्, जयपुरपरिसरः**

# भारतीयज्योतिषशास्त्रदृष्ट्या वृष्टेर्निर्णयः

❑ निखिलेश शर्मा

''जलमेव जीवनम्'' इत्यस्याः लोकोक्त्याः महत्वं को न जानाति स्वजीवने? अखिलब्रह्माण्डस्य पंचमहाभूतेषु सर्वप्रथमं उत्पन्नत्त्वमस्ति जलम्। चराचरजीवानां प्रथमाश्रयत्वात् वनस्पतिसस्ययोरुत्पत्ति-कारणत्वा च्च सम्पूर्णजीवसृष्टेः एतदेव मुख्याधारो वर्तते। वयं अन्नसद्भावादेव समस्तप्राणिनां जीवनं कल्पयितुं शक्नुमः। यथोक्तं-

**''अन्नमेव जगत्प्राणस्तन्मूलं भुवनं यतः''**[1]

अतः स्थूल-सूक्ष्मरूपेण जलस्य संबंधः सर्वत्रैवास्ति। तस्य जलस्यापि हेतुभूतमस्ति वृष्टिः। वृष्टेर्विना जलस्य वितरणं न भवितुं शक्नोति, येन च भौमजलस्य पूर्त्यभावात् अन्नाभावो जायते।

भारतसदृशे कृषिप्रधानदेशे सम्पूर्णकृषेः 60 प्रतिशतभागः वृष्टिमाध्यमेनैव जायते। अनेन सिद्ध्यति यत् वृष्टिरेव भारतीयार्थव्यवस्थायाः मुख्यनिर्धारिका इति। भारतीयसंस्कृतेः प्राचीनग्रंथेष्वपि तथ्यमिदं सुष्ठु प्रति-पादितमस्ति। यथा कृषिपाराशरे-

**''वृष्टिमूला कृषिः सर्वा वृष्टिमूलं च जीवनम्।**[2]
**तस्मादादौ प्रयत्नेन वृष्टिज्ञानं समाचरेत्।।''**

अतएव कदा वृष्टिर्भविष्यति? कीदृशी वृष्टि-र्भविष्यति? वृष्टेः किं विज्ञानमिति? एतादृशाः बहवः प्रश्नाः मानवमनसि कौतूहलं समुत्पादयन्तः तिष्ठन्ति एव। अस्या मानवजिज्ञासायाः निवारणाय अस्माभिर्प्रावृट्-कालो विशेषेण विचारणीयोऽस्ति।

वर्तमानसमये प्रावृट्कालारंभ एव ''मानसून'' इति नाम्ना ज्ञायते। भारतसर्वकारस्य ''मौसमविभागेन'' प्रावृट्कालारम्भविषये मानसूनविषये वा बहवः निर्णयाः विधीयन्ते। परञ्च तथा सत्यपि वर्षाया आगमनविषये कृतानि भविष्यकथनानि सत्यविरहितानि एव तिष्ठन्ति। भारतीयज्योतिषशास्त्रपरम्परायां प्राचीनाचार्यैः स्वकीया-तीन्द्रियज्ञानेन वृष्टिविषयकं सर्वं ज्ञानं कृतम्। तत्सर्वं ज्योतिषशास्त्रस्य संहिता-स्कन्धे वर्णितमस्ति गर्गपराशरयोः काले तु विज्ञानमिदं गुरुशिष्य-परम्परामाध्यमेन विकसदासीत् परञ्च कालान्तरेण अनेकेषां ज्योतिर्विदां प्रयासेन यत् वृष्टिविषयकं परिपक्वज्ञानं प्रतिपादितम् तद् आधुनिकवैज्ञानिका अपि अनुसरन्ति। इत्यस्मिन्प्रसंगे वराहमिहिराचार्यकृतवृहत्-संहितायां वृष्टिज्ञानविषये अस्माभिर्विशदवर्णनं प्राप्यते। वर्षाआगमनस्य ज्ञानार्थं कूर्मचक्रमाध्यमेन भूमण्डलीय-स्थानानां वर्गीकरणं विधाय प्रत्येकस्थानस्य कृते तात्कालिकलक्षणैः सद्यो वृष्टिज्ञानं, मेघगर्भधारणलक्षणैश्च षाण्मासिकवृष्टिज्ञानं क्रियते इति आचार्याः।

तत्त्वज्ञानं पंचभिः पकारैर्जायते -

**1. वायुमाध्यमेन 2. मेघलक्षणमाध्यमेन 3. ग्रहचारमाध्यमेन 4. भूमिलक्षणमाध्यमेन 5. शकुनमाध्यमेन सद्योवृष्टिलक्षणमाध्यमेन वा।**

**1. वायुमाध्यमेन वृष्टिज्ञानम् :-** वायुः वृष्टिकारकतत्वेषु प्रमुखो वर्तते। वैदिकवाङ्मये वायुरेव इन्द्रस्य सहोदररूपेण ''मरुत्'' नाम्ना विख्यातोऽस्ति। वायुः दितेरपत्यं स हि सूर्येण (इन्द्रेण) स्ववज्रेण एकोन-पञ्चाशत्खण्डेषु विभक्तः कृतति वेदेषु वर्णितमस्ति।

1 वनमाला 1/3
2 कृषिपाराशरः वृष्टिखण्डं श्लो. 1

वैज्ञानिकदृष्ट्याऽपि वायोः उत्पत्तेः कारणं सूर्य एवास्ति तस्माच्चैव मेघाः जायन्ते। पौषमासस्य वायोः प्रवाहेण वृष्टिविचारः कृतः महर्षिपराशरेण। यथा अग्रिमवर्षस्य द्वादशमासेषु वृष्टिविचारार्थं पौषस्य त्रिंशद्दिनानि द्वादशभिर्विभज्य सार्धदिनद्वयतुल्यलब्धिमाधारीकृत्य वायोः प्रवाहेण चैत्रशुक्लादारभ्य मासिकीं वृष्टिं जानीयात्, अर्थात् तत्र पौषमासे सार्धदिनद्वयमानस्य वायुपरीक्षणेन अगिमवर्षस्य तत्संबंधि मासस्य वृष्टिफलं ज्ञायते। तत्रापि प्रत्येकदिनस्य स्थितिज्ञानाय पञ्चपञ्च-घटिकानां वायोः परीक्षणं पताकामाध्यमेन कुर्यात्। तत्र उत्तरपश्चिमयोर्वायुर्वृष्टिकारकः पूर्वदक्षिणयोर्वायुश्च अवृष्टिकारकश्चेति। यथा–

**''सार्द्धदिनद्वयं मानं कृत्वा पौषादिना बुधः।**
**गणयेन्मासिकीं वृष्टिमवृष्टिं वाऽनिलक्रमात्।।**
**एकैकपन्चदण्डेन मासस्य दिवसो मतः।**
**पूर्वार्द्धे वासरी वृष्टिरन्तरार्धे च नैशिकी।।''**[3]

**2. मेघमाध्यमेन वृष्टिज्ञानम्ः**– संस्कृतवाङ्मये मेघानां स्वरूपं वर्णयन् कालिदासः कथयति– ''धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः''4 अर्थात् धूमाग्नि-जलवायवादीनां घनीभूतस्वरूपः मेघः इति। मते च मेघाः– 1. संवर्तकः 2. आवर्तकः 3. पुष्करः 4. द्रोणश्चेति। तत्र संवर्तकः बहुजलयुक्तः सघनवृष्टिकरः, आवर्तकः शुष्कः अवृष्टिकरः, पुष्करः अल्पजलयुक्तः अल्पवृष्टिकरः, द्रोणश्च कृषियोग्यवृष्टिकरो भवति। प्रसंगेऽस्मिन् मरंदप्रकाशे मेघानयनप्रकारो वर्णितः।

**शकाब्दो रामसंयुक्तस्तथा वेदैर्विभाजितः।**
**शेषमेघं विजानीयात् आवर्तादिक्रमेण च।।**[5]

अर्थादभीष्टशकाब्दे त्रयं संयोज्य चतुर्भिर्विभजेत् एकादिशेषं आवर्तादिक्रमेण मेघो भवति। मेघानां जलग्रहणकालोऽपि निश्चितो वर्तते यश्च मेघगर्भधारण-मिति नाम्ना व्यवह्रियते। गर्भधारणं भवति यथा–

**''मार्गशिरः सितपक्षप्रतिपत्प्रभृति क्षपाकरेऽषाढाम्।**
**पूर्वां वा समुपगते गर्भाणां लक्षणं ज्ञेयम्।।''6**

इदानीं कदा वर्षा भविष्यतीति चिन्तयता वराह-मिहिरेण धृतगर्भस्य प्रसवकालोऽपि चन्द्रचारमाध्ये-मेनोक्तो वर्तते। यो गर्भो यस्मिन् नक्षत्रे व्यवस्थिते चन्द्रे भवेत् स गर्भः चन्द्रयुक्तनक्षत्रवशात् प्रसवमायाति स च षड्भिर्मासैर्गतैस्तत्रैव तस्मिन्नैव नक्षत्रे चन्द्रे सति प्रसवमायाति। अर्थात् सावनमानेन पञ्चनवत्यधिकैकशते दिवसेऽतीते तन्नक्षत्रस्थिते चंद्रे गर्भस्य परिपाकात् वृष्टिर्भवति यथा–

**''यन्नक्षत्रमुपगते गर्भश्चन्द्रे भवेत् स चन्द्रवशात्।**
**पञ्चनवते दिनशते तत्रैव प्रसवमायाति।।''**[7]

तत्रापि गर्भलक्षणं प्रसवश्च व्यत्यासेन भवति अर्थात् शुक्लपक्षसंभूता गर्भाः कृष्णपक्षे, कृष्णपक्षसंभूता गर्भाश्च शुक्लपक्षे प्रसवमायान्ति।

**3. ग्रहयुतिचारमाध्यमेन वृष्टिज्ञानम्** – यदि गुरुणा दृष्टौ क्रूरग्रहैः अदृष्टौ बुधशुक्रौ एकराशिमध्ये स्थितौ स्याताम् तर्हि महावृष्टियोगस्य निर्माणं जायते। यथा–

**''अदृष्टौ न युतौ क्रूरैर्ज्ञशुक्रावेकराशिगौ।**
**जीवदृष्टो विशेषेण महावृष्टिस्तदा भवेत्''**[8]

विभिन्नेषु नक्षत्रेषु वा ग्रहचारवशादपि वृष्टेर्ज्ञानं भवति। तत्र सप्तनाडीत्रिनाडीवक्रादीनां विमर्शेन वर्षाया:

3 कृषिपराशर श्लो 29. 31
4 मेघदूत श्लो 6
5 मकरन्दप्रकाशः, सम्वतसराद्यानयनाधिकारः श्लो. 15
6 बृहत्संहिता, गर्भलक्षणाध्यायः, श्लो. 6
7 बृहत्संहिता, गर्भलक्षणाध्यायः, श्लो. 7
8 वर्षप्रबोध. श्लो. 153

निर्धारणं क्रियते। तस्मिन्नेव प्रसंगे ग्रहनक्षत्राणां पुंस्त्रीनपुंसकसंज्ञावशात् पारस्परिकसंयोगमाध्यमेनापि वृष्टेः कथनं क्रियते। यथा-

**'आर्द्रादिदशनारीणां विशाखात्रिनपुंसके।**
**मूलाच्चतुर्दशज्ञेयं पुंसा............।।'**[9]

इति नक्षत्राणां पुंस्त्रीनपुंसकादिसंज्ञा स्पष्टमेव। एवमेव ग्रहाणामपि पुरुषादिसंज्ञा विहिता वृहज्जातके -

**''बुधसूर्यसुतौ नपुंसकाख्यौ, शशिशुक्रौ युवती नराश्च शेषाः।''**[10]

तत्फलञ्च -

**''स्त्रीपुंसि वर्षते मेघो वायुर्नारीनपुंसके।**
**स्त्रीयोगे बहुशीतं वै पुंयोगे बहुदाहकम्।।''**[11]

**4. भूमिमाध्यमेन वृष्टिज्ञानम्:-** मेघाः पृथिव्यां सर्वत्र समानरूपेण न वर्षन्ति। क्वचिदतिवृष्टिः, क्वचिदनावृष्टिः, क्वचिच्च खण्डवृष्टिर्भवति। कारणं हि अत्र देशभेदेन भूस्वरूपभेदः वातावरणभेदश्च विद्यते। प्रसंगेऽस्मिन् प्राचीनाचार्यैः अनूपजांगलमिश्रभेदेन भूमिं त्रिधा विभज्य वृष्टिज्ञानं कृतम्।

**5. सद्योवृष्टिलक्षणमाध्यमेन वृष्टिज्ञानम् :-** उपर्युक्त नियमाधारेणापि कृते वृष्टिविचारे तात्कालिकैः कारणैः वर्षायाः स्थितिः किञ्चिदन्तरिता भवति। तानि एव कारणानि सद्योवृष्टिलक्षणानि उक्तानि। यथा- वायोर्निरोधः, मत्स्यानां स्थलागमनशीलत्वं मण्डूकानां पुनः पुनः शब्दकरणमित्यादयः सद्योरेवृष्टेः कारणानि सन्ति। एवमेव अत्यर्थमवनिं नखैर्विलिखन्तः विडालाः, लोहपात्राणां विस्रगन्धसहिताः मलसमूहाः। मार्गे बालरचिताः सेतुबंधाः, यदि दृश्यन्ते तर्हि शीघ्रमेव वर्षण-मिति कथयन्ति। यथा-

**''मार्जारा भृशमवनिं नखैर्लिखन्तो, लोहानां मलनिचयः सविस्त्रगन्धः।**
**स्थल्यां शिशुरचिताश्च सेतुबन्धाः, सम्प्राप्तं जलमचिरान्निवेदयन्ति।।''**[12]

एवमेव उपसर्गेण विना पिपीलिकानां स्वकीयाण्डानां अन्यदेशे नयनम्, सर्पाणां मैथुनम् वृक्षावरोहणञ्च, गवां अकारणमेव प्लवनम् एतान्यपि वृष्टिकारणानि सन्ति।

अनेन प्रकारेण यदि आधुनिकविधिना सह भारतीयज्योतिर्विज्ञानोक्तप्रकारैः वृष्टिकथनं भवेत्तर्हि इदं राष्ट्रविकासे महत्वपूर्णयोगदानं भविष्यति।

**( शोधछात्रः ज्योतिष विभाग )**
**रा.सं.सं., जयपुर परिसरः**

9 आर्षवर्षावायुविज्ञानम् पृ. 277
10 वृहज्जातकम् अ. 2 श्लो. 6
11 आर्षवर्षावायुविज्ञानम् पृ. 278
12 वृहत्संहिता सद्योवर्षाणाध्यायः श्लो. 5

**( संस्कृत समाचारः )**

## पं. सत्यनारायणशास्त्रिणे बाणभट्टपुरस्कारः

विविधकाव्यप्रणयनेनार्जितयशसे ''भारतकुवलयम्'' प्रभृत्युत्कृष्टगद्यकाव्य रचयित्रे राष्ट्रपतिसम्मानिताय राजस्थानराज्यात्तर्गते अजमेरनगरे कृत वसतये विद्वद्वर्याय पं. सत्यनारायण शास्त्रिणे लखनऊस्थेन उत्तरप्रदेशसंस्कृत संस्थानेन 51000/- रु. मुद्रात्मको बाणभट्टपुरस्कारः समार्प्यत। 22 जुलाई दिवसे लखनऊनगरे समायोजिते सम्मानसमारोहे उत्तरप्रदेशमुख्यमन्त्रिणा शास्त्रिवर्यः सम्मानेनानेन सभाजित इति सूचनया प्रमुदितो भारती परिवारो वर्धापयति शास्त्रिवर्यम्।

# संयुक्तपरिवारे कर्त्तव्यनिष्ठा रामायणकालसन्दर्भे

❑ स्वाती जैनः

कुटुम्बो वा परिवारो वा समस्तमानवीयसंघटनानां आदिमं सोपानम् अस्ति तथा मानवीयोन्नतेः प्रथमचरणम्। समाजस्य इकाईरूपे परिवारः तस्य परम्पराणां भावनानाञ्च आचारविचाराणाञ्च मानवमनसि आत्कसात् करोति। वाल्मीकिः प्राचीनादर्शाणां विषये मानवान् शिक्षयति यत् सर्वेषां संस्काराणां तथा च परम्पराणां पालनं मानवैः करणीयमेव।

परिवारस्य सामूहिकहितरक्षणाय सर्वैः सह सम्माननीयस्नेहमयव्यवहाराय सर्वैः व्यक्तिगतस्वार्थाः उपेक्षणीयाः।

कुटुम्बस्य संघटनायाः उद्देश्यमासीद्यत् सर्वेऽपि कुटुम्बिनः एकस्य गृहप्रमुखस्य आदेशान् स्वीकुर्युरिति।

परिवारिकरूपं निःसन्देहं पैतृकमासीत्। परिवारे पिता कुटुम्बस्य प्रमुखम् अभवत् यस्य आदर्शाः सर्वैः स्वीकर्त्तव्याः आसन्। पत्नी यद्यपि गृहस्वामिनी आसीत् किन्तु गृहस्वामिनः आश्रिता आज्ञाकारिणी मर्यादिता च भवति स्म। सर्वेषां पुत्र-पुत्रीणामुपरि पितुः पूर्ण-नियन्त्रणमासीत् येन तेषां योग्यजीवननिर्माणं भवेत्। पितुः अनुमतिं विना पुत्राः स्वजीवनस्य अर्धाङ्गिन्याः चयनं न कुर्वन्ति स्म। यथा धनुर्भङ्गं कृत्वा सीताप्राप्त्यधिकारी रामः पितुराज्ञां विना विवाहप्रस्तावं न स्वीकृतवान्।

**दीयमानां न तु तदा प्रतिजग्राह राघवः।**
**अविज्ञाय पितुश्छन्दमयोध्याधिपतेः प्रभोः।।**

(बा. रामायण २/११८/५१)

व्यावहारिककार्येष्वपि पितुराज्ञा सर्वोपरि भवति स्म। पिता स्वसम्पत्तेः स्वेच्छानुसारं विभाजनं कर्तुं शक्नोति। यथा दशरथेन कैकयीपित्रे इदं वचनं प्रदत्तं यत् कैकयीपुत्रः एव कौशलनरेशः भविष्यति। कौशल-राज्यस्य उत्तराधिकारी भविष्यति।

**पुरा भ्रातः पिता नः स मातरं ते समुद्वहन्।**
**मातामहे समाश्रौषीद्राज्यशुल्कमनुत्तमम्।।**(२/१०७/३)

यथा भरतः रामं कौशलराज्यस्य सम्राट्पदं स्वीकर्तुं प्रार्थितवान् तदा रामः अपि उक्तवान्-

**वने वा चीरवसनं सौम्यकृष्णजिनाम्बरम्।**
**राज्ये वाऽपि महाराजो मां वासयितुमीश्वरः।।** (२/१०१/२०)

महाराजा दशरथोऽपि स्वराज्यसभायां गर्वपूर्वकमेतत् उद्घोषितवान् यत् प्रजानां रक्षायै जागरूक भूत्वातया मयाऽपि मम पूर्वजानां परम्परायाः पालनं कृतम्। मयाऽपि तेषां मार्ग अनुसृतः।

**मयाप्याचरितं पूर्वैः पन्थानमनुगच्छता।**
**प्रजा नित्यमनिद्रेण यथाशक्त्यभिरक्षिताः।।** (२/२/६)

रामः वनगमनाय अनुमतिं स्वीकर्तुं स्वमात्रेऽपि एतदेव तर्कं प्रदत्तवान्-पितुराज्ञाया पालनं कृत्वा अहं पूर्वजेभ्यः धर्मात्मापुरुषेभ्यः अनुसृतः मार्गः एव अनुसरामि।

**पूर्वैरयमभिप्रेतो गतो मार्गोऽनुगम्यते।** (२/२१/३६)

तथैव अपरत्र यदा कैकय्या इक्ष्वाकुकुलकल्याणस्य अवहेलनां कृत्वा स्वस्य तथा स्वपुत्रस्य व्यक्तिगत-

स्वार्थेभ्य: महत्वं प्रदत्तं तदैव दशरथाय स्वस्य वंशोपरि आगामिन्या: घोरविपत्ते: सम्भावना ज्ञाता।

**इक्ष्वाकूणां कुले देवि सम्प्राप्तः सुमहानयम्।**
**अनयो नयसम्पन्ने यत्र ते विकृता मतिः।।( २/१२/१९ )**

रामस्य वनवासस्य तथा भरतस्य राज्याभिषेकस्य दुराग्रहं कृत्वा इक्ष्वाकुपरिवारस्य प्रतिष्ठाया उपरि अपयशस: चन्दनं कृतवत्या: कैकय्या: आलोचना स्वकुलोपघातिनी कुलघ्नी कुलपांसनी इत्यादिभि: विशेषणै: जाता।

तथा कैकयीपुत्र: भरत: तत्स्वार्थपूर्णाग्रहं निर्मूलं कृत्वा एतत् कथितवान्-

**ज्येष्ठस्य राजता नित्यमुचिता हि कुलस्यनः।( २/७१/७ )**

अनेनैवम् पारिवारिकसंघटने पितुरनन्तरं ज्येष्ठपुत्रस्य पितृतुल्य सम्मानाधिकार आसीत्। स: ''वंशकर:'' उच्यते।(१/७४/२४)

परिवारे पुत्रस्नेहस्य केन्द्रबिन्दु: शोभते। ''आदर्श-तलसंस्थितम् तथा **नास्ति पुत्रसमः प्रियः'' इति एतदुदाहृतम्।( २/७४/२४ )**

पुत्रेष्वपि ज्येष्ठपुत्रस्य अधिकारयुक्तं स्थानं शोभते स्म वंशगतकारणेन तथा भावनात्मककारणेन ज्येष्ठ: पुत्र: पितु: अधिकस्नेह भाजन: भवति स्म।

**प्रायेण हि नरश्रेष्ठ ज्येष्ठाः पितृषु वल्लभाः। १/६१/१९**

तेषां केतुरिव ज्येष्ठो रामो रतिकर: पितु:।१/१८/२४

उत्तराधिकाररस्य नियमोऽपि ज्येष्ठपुत्राय एव विशेषाधिकारं प्रददाति। लघुभ्रातृभ्य: पूर्वं ज्येष्ठपुत्रस्य राज्याभिषेको भवति स्म।

**सततं राजपुत्रेषु ज्येष्ठो राजाभिषिच्यते।** २/७३/२२

ज्येष्ठभ्रातु: विवाहाय प्राथमिकता प्रदीयते स्म। तेन पूर्वविवाहकारिण: लघुभ्राता ''परिवेत्ता'' इत्युच्यते। लघुभ्राता: अपि ज्येष्ठभ्रातरं पितृतुल्यमेव स्वीकुर्वन्ति स्म। तस्यादेशानां तनमनोभ्यां पालनां कुर्वन्ति स्म। यथा-

अ) यदा एकदा कुम्भकर्ण: लङ्काया: राजसभायां रावणं प्रति उपदिष्टवान् तदा रावण: कुम्भकर्णाय भार्त्सेतवान्- **मान्यो गुरुरिवाचार्यः किं मां त्वमनुशाससे।६/६२/२३**

ब) भरत: ज्येष्ठानुवर्ती अर्थात् भ्रातु: आज्ञापालको स्मृत:। एवमेव ज्येष्ठभ्रातुरपि एवमेव कर्त्तव्यासीत् यत् सोऽपि लघुभ्रातृन् प्रति पुत्रतुल्यव्यवहारं कुर्यादिति। राजशासनसमये राम: सदैव लघुभ्रातृभ्य: परामर्शं ग्रहीतवान् आसीत्। तेषां: प्रसन्नतार्थं सदैव सच्चेष्टा क्रियते स्म।

पितृ शब्द: पा धातो: रक्षणार्थे व्युत्पन्न:। अतएव पिता संरक्षको विद्यते। पितृ पदस्य व्युत्पत्तिरेव पितु: उत्तरदायित्वं सूचयति यत् पिता सर्वदा स्वसन्तीनां उपकाराय उद्यतो भवति स्म।

**यन्मातापितरौ वृत्तं तनये कुरुतः सदा। न सुप्रतिकरं तत्तु मात्रा पित्रा च यत्कृतम्।।**
**यथाशक्तिप्रदानेन स्वापनोच्छादनेन च।**
**नित्यं च प्रियवादेन तथा संवर्द्धनेन च।।**२/१११/९-१०

पितरौ अपि स्वसन्तते: परमस्नेहभाजनौ आस्ताम्। यस्मिन् पुरुषे सन्तानस्य प्रादुर्भावस्य मूलं प्राप्यते। य: प्रत्यक्षदेवतुल्य: वर्तते। कोऽपि पुत्र: तादृशस्य पितु: विरोधं कथं कर्तुं शक्नोति? मातु: पितु: आज्ञापालनं पुत्रस्य सर्वाधिकरूपेण महत्वपूर्णं कर्त्तव्यमुच्यते।

रामेण कथितम्- ययोः सेवया धर्मार्थकामाप्तिः भवति, आराधनया तयोः पित्रोः त्रिलोकानां आराधना भवति तयोः तुल्यं पवित्रं अस्मिन् सम्पूर्णसंसारे अन्यत्किमपि नाऽस्ति।

वयं स्वमध्ये उपस्थितौ प्रत्यक्षदेवते पितरौ उपेक्ष्य यदि अप्रत्यक्षान् सहस्रमपिदेवताः पूजयामश्चेत् तन्नोचितम्।

निष्कर्षः - पारिवारिकसदस्यानां सौहार्दमयः पारस्परिकसम्बन्धः एव आर्यसंस्कृतेः प्रधानसम्बलो तथा तस्योत्कृष्टतायाः प्रमुखं रहस्य असीत्।

रामायणकारेण दशरथस्य पारिवारिकसदस्यानां मध्ये अत्यन्तस्नेहपूर्णाः एव सद्भावपूर्णाः सम्बन्धा दर्शिताः। यथा- पिता-पुत्रयोः भ्रातृ-भ्रात्रोः पति-पत्न्योः भ्रातृजाययोः श्वश्रूवध्वोः इत्यादयः।

अनेन प्रकारेण वयं पश्यामः यत् मातुः पितुः भक्तिः सन्तानप्रेम पति-पत्न्योरनुरक्तिः अतीतपरम्परासु आस्था तथा पूर्वजानां श्रद्धामय स्मरणम्- एते सुकुमारतन्तवः सन्ति ये परिवारे सर्वान् सदस्यान् परस्परं बध्नन्ति एव।

मनुष्यस्य चरित्रनिर्माणे कुटुम्बस्य महद्योगदानं भवति।

परिवार एव एतादृशः सुदृढः शिक्षणालयः विद्यते यस्मिन् व्यक्तिः सामूहिककल्याणाय वैयक्तिकप्रवृतीन् तथा महत्वाकांक्षा उपेक्ष्य स्नेहस्य, सौहार्दस्य, गुरुं प्रति आदरभावस्य भक्तिभावस्य च पाठं पाठति वा शिक्षयति।

**शोधच्छात्रा**

**राष्ट्रिय संस्कृत संस्थानम् जयपुर परिसरः जयपुरम्।**

# निवेदन

**भारती पत्रिका कार्यालय अपने आदरणीय ग्राहकों तक प्रतिमाह समय पर पत्रिका पहुँचाने की व्यवस्था सुनिश्चित करना चाहता है। इस दृष्टि से सभी ग्राहकों से निवेदन है कि निम्नानुसार अपनी सूचनाएं कार्यालय को पोस्ट कार्ड द्वारा अथवा इसी पत्र को काट कर लिफाफे में कार्यालय के पते पर भेजने का श्रम करें। यदि उक्त प्रकार से सूचना भेजने में कठिनाई हो तो मोबाइल नं.– 09352030291 / 8947055999 पर सूचना लिखवा सकते हैं अथवा SMS भी कर सकते हैं।**

**नाम....................................पुत्र/पुत्री श्री.............................भवन संख्या...........**

**गली/ मोहल्ला/कॉलोनी..................................वाया/पोस्ट ऑफिस..........................**

**तहसील................................जिला........................राज्य..........................**

**देश....................पिन........................................दूरभाष............................**

**मोबाईल नं............................ईमेल..........................................................**

**निवेदक सुदामा शर्मा, प्रबन्ध सम्पादक**

**भारती संस्कृत मास पत्रिका**

**बी–15, भारती भवन, न्यू कॉलोनी, जयपुर–302001 (राज.) दूरभाष–2379014**

**ई–मेल – sanskritbharti09@gmail.com**

नारी-स्तम्भः

# शिवः शक्त्या युक्तो यदि भवति शक्तः प्रभवितुम्

❑ डॉ. राजेश्वरी भट्टः

स्वाधीनतासंग्रामे भारतदेशात् ब्रिटिशशासनं सर्वथा उन्मूलयितुं निखिलं राष्ट्रं प्राणपणेन समर्पितमासीत्। पुण्यकर्मण्यस्मिन् नार्योऽपि प्रत्यक्षरूपेण परोक्षरूपेण वा अहमहमिकया संलग्ना आसन्। अस्मिन् प्रसंगे आत्मनः सशक्तवाण्या सार्थकलेखिन्या च ब्रिटिश-शासकानां हृदये कम्पकर्त्रा, राष्ट्रहिताय हर्षेण पञ्चवारं कारागृहस्य कृष्णकक्षे वासं विदधता, किमधिकं राष्ट्रहिताय प्राणांस्त्यक्तवता राष्ट्रभक्तेन 'गणेशशंकरविद्यार्थिना' कारागारे गमनात् पूर्वं पत्नीं प्रति प्रेषितं पत्रमिदं गृहे वसन्त्याअपि परोक्षेण राष्ट्रहिताय समर्पितायाः त्यागमूर्तेः पति-परायणायाः प्रकाशमहाभागाया राष्ट्रनिष्ठायाः प्रशस्यं प्रमाणं वर्तते।

मम परमप्रिये प्रकाश !

ह्यः तव पत्र प्राप्तं त्वया च यत् किमपि लिखितं तत् सर्वं समीचीनं वर्तते। क्षमायाचनापेक्षया मरणं वरमस्ति। त्वं विश्रब्धा भव अहं किमप्यभव्यं नाचरिष्यामि। त्वया वर्द्धितेन मनोबलेन अहं सुदृढमात्मानं मन्ये। अहं तव कृते बालकानाञ्च विषये अतीव चिन्तितोऽस्मि किन्तु तव हृदयं कियन् निर्मलं उन्नतञ्च विद्यते। इदं विचिन्त्य मम मनसि बहुसंतोषो वर्तते। ईश्वरः तव हृदयं बलवत्तरं कुर्यात्। यदि त्वं दृढतां धारयिष्यसि तर्हि मम मनः कदापि विचलितं न भविष्यति। अहं त्वत्तः किमपि गोपनीयं कर्त्तुं न इच्छामि। अहं तु सहर्षं भाविविपदाः सहिष्ये किन्तु मम मनसः स्थिरतायै तव हृदयस्य दृढताऽऽ निवार्याऽस्ति। आम् अहं 'माखनलाल' महोदयेन सह तस्य निवासस्थलं गच्छामि होलिकामहोत्सवे तत्रैव निवसिष्यामि, तदनन्तरं द्वितीयायाः तृतीयायाः वा दिनेऽहं कानपुरनगरं गमिष्यामि। तस्मिन्नेव दिने मध्याह्न-समये अहम् आरक्षिदलस्य समक्षम् आत्मसमर्पणं करिष्यामि। अहं तु पूर्वमेव आरक्षिदलस्य समक्षं समर्पणाय तत्परः आसम् किन्तु कारागृहे गमनात्पूर्व युष्माकं दर्शनं मम धर्मो वर्तते। पश्य ईश्वरे धर्मे च विश्वासं कुरु। अद्य कष्ट-दिवसैः शिरः आच्छन्नम्, श्वः सुखमय-दिवसा अपि आगमिष्यन्ति। धर्महेतोः यापितानां कष्ट- दिवसानामनन्तरं यानि दिनान्यागमिष्यन्ति तानि परमात्मनः प्रसादेन सुखस्य दिनानि भविष्यन्ति। हरिकृष्णास्य, विमलायाः, ओङ्कारस्य च कृते स्नेहाशिषः सन्तु।

कारागृहगमनात् पूर्वं राष्ट्रनिष्ठया, राष्ट्रस्य च

**स्वाधीनतायै संघर्षरतेन 'गणेशशंकर विद्यार्थिना' विषमसमयेऽपि पत्नीं प्रति प्रेषितेन पत्रेण ज्ञायते यत् तस्य पत्नी प्रकाशदेवी भर्तुर्मनोवृत्तानु-सारिणी, शक्तिरूपा सहस्त्रेष्वेका राष्ट्रहित-चिन्तिका नारी आसीत्।**

**हिन्दी अनुवाद**

स्वाधीनता संग्राम में भारतभूमि से अंग्रेजी शासन की जड़े उखाड़ने के लिए समस्त-राष्ट्र प्राणपण से समर्पित था। पुरुषों के साथ नारियाँ भी इस कार्य में आगे आगे बढ़कर प्रत्यक्षरूप से या परोक्ष रूप से संलग्न थी। इस प्रसंग में अपनी सशस्त वाणी एवं सार्थक लेखिनी से ब्रिटिशशासकों के हृदय में कम्पन उत्पन्न करने वाले राष्ट्र के हित के लिए पाँच बार हर्ष से कारागार की काली कोठरी में निवास करने वाले अधिक क्या राष्ट्रहित  में प्राणों का त्याग करने वाले राष्ट्र भक्त 'गणेशशंकर विद्यार्थी' के द्वारा जेल जाने से पूर्व पत्नी के लिए भेजा हुआ यह पत्र घर में रहकर भी परोक्षरूप से राष्ट्र के हित के लिए समर्पित त्यागमूर्ति एवं पतिव्रता आदरणीया प्रकाश की राष्ट्रनिष्ठा का प्रत्यक्ष प्रमाण है।

**मेरी परम प्यारी प्रकाश।**

कल तुम्हारा पत्र प्राप्त हुआ, तुमने जो कुछ लिखा है वह बिल्कुल ठीक है। माफी मांगने से अच्छा यह है कि मौत हो जाए। तुम विश्वास रखो, कि मैं बेइज्जती का काम नहीं करूंगा। तुमने जो साहस दिलाया उससे मेरे जी को बहुत बल मिला। मुझे तुम्हारी और बच्चों की बहुत चिन्ता है। परन्तु  तुम्हारा हृदय कितना अच्छा और ऊँचा है उससे मेरे मन को बहुत सन्तोष हो रहा है। ईश्वर तुम्हारे मन को दृढ़ रखे अगर तुम दृढ़ रहोगी तो मेरा मन कभी न डिगेगा। मैं तुमसे कोई बात छिपाना नहीं चाहता। मैं खुशी से तैयार हूँ जो मुसीबतें आएँगी उन्हें हँसते हँसते सह लूंगा लेकिन मेरी हिम्मत को कायम रखने के लिए यह आवश्यक है कि तुम अपना जी न गिरने दो। 'माखनलाल जी' के साथ मैं उनके घर जा रहा हूँ होली वहीं करूँगा। होली के बाद दूज या तीज को मैं कानपुर पहुँचूँगा और उसी दिन दोपहर तक मैं अपने को पुलिस के हाथों में दूँगा। मैं सीधे ही पुलिस के हाथों में अपने को दे देता मगर एक बार तुम लोगों को देख लेना अपना धर्म समझता हूँ, देखो ईश्वर और धर्म पर विश्वास रखो। आज कष्ट के दिन सिर पर है कल सुख के दिन भी आवेंगे, वे परमात्मा की कृपा से अच्छे सुख के दिन होंगे। हरिकृष्ण और ओंकार को प्यार-तुम्हारा गणेशशंकर।

राष्ट्र की स्वाधीनता के लिए संघर्षरत **गणेशशंकर** विद्यार्थी के द्वारा विषम समय में लिखे गये पत्र से ज्ञात होता है कि उनकी पत्नी प्रकाश देवी पतिव्रता शक्तिरूप हजारों में एक राष्ट्र हित चिन्तिका नारी थी।

❖❖❖

आयुर्वेद-स्तम्भः

# वर्षाकाले सेवनीयाः योगाः

❑ प्रो. बनवारीलालगौडः
पूर्व-कुलपतिः

**पूर्वस्मिन् लेखे स्पष्टीकृतं मया यद् वर्षासु वातप्रधानस्य दोषत्रयस्य प्रकोपो भवति। ग्रीष्मे सूर्यांशुसन्तप्तानां जनानां स्नेहांशस्य क्षपणं भवति, रूक्षतायाश्चाभिवृद्धिर्भवति, तया हि रूक्षे काल-स्वभावाच्च दुर्बले शरीरे वातस्य सञ्चयो भवति। सञ्चितश्च सः वायुरुष्णकाले उष्णगुणस्वभावात् प्रकोपं न याति। ग्रीष्मे आहारद्रव्याणि तथा सेवनीया औषध्यः सन्तप्तानि रूक्षाणि लघूनि च भवन्त्यत एव वायुः ग्रीष्मे सञ्चितो भवति, आचार्यः वाग्भटः निर्दिशति, यत्-**

**चीयते लघुरूक्षाभिरोषधीभिः समीरणः।**
**तद्विधस्तद्विधे देहे कालस्यौष्ण्यान्न कुप्यति।।**
**( अ.हृ.सू. 12/25 )**

इससे पहले वाले लेख में मैंने स्पष्ट किया था कि वर्षा में वातप्रधान त्रिदोष का प्रकोप होता है। ग्रीष्म में सूर्य की किरणो से सन्तप्त लोगों के स्नेहांश का क्षपण होता है तथा रूक्षता की अभिवृद्धि होती है, उसके कारण रूक्ष और कालस्वभाव से दुर्बल शरीर में वातदोष का सञ्चय होता है। वह सञ्चित वायु उष्णकाल में उष्णगुण स्वभाव के कारण प्रकोप को प्राप्त होता है। ग्रीष्म में आहारद्रव्य तथा सेवनीय औषधियाँ रूक्ष तथा लघु होती हैं, शरीर भी सूर्य की किरणों से सन्तप्त, रूक्ष और लघु होते हैं, इसलिए वायु ग्रीष्म में सञ्चित होता है, आचार्य वाग्भट कहते हैं कि -

लघु और रूक्ष गुणवाली औषधियों से वैसा ही वायु (लघु-रूक्ष गुणवाला) वैसे ही (लघु-रूक्षबहुल) शरीर में सञ्चित होता है, काल के उष्ण गुण के कारण वह प्रकुपित नहीं होता।

**वर्षाकाले तु जाठराग्नेर्मन्दता भवति आदानकाल-स्वभावात्मकान् ग्रीष्मपर्यन्तान् त्रीनृतून् सहते यच्छरीरं तत्तु दुर्बलं भवति। यद्यपि वर्षाकालतः विसर्गस्य प्रारम्भो भवति तथापि आदानस्य अन्तकालः ग्रीष्मः पूर्णतः सन्तप्तो भवति, तेन हि श्रान्तं क्लान्तं दुर्बलं शरीरं पक्तुः दौर्बल्यात् सम्यक् पोषणं प्राप्तुं न शक्नोति, कालेऽस्मिन् ग्रीष्मे सञ्चितो वायुः कालस्वभावात् प्रकुपितो भवति। अनेन सहैवाद्भिरम्लविपाकाभिरोष-धीभिश्च पित्तं चयं याति किन्तु कालस्य शैत्यतः तत् पित्तं प्रकोपणे समर्थं न भवति। अत एव वर्षाकाले वातस्य शमनकारकाणामौषध-द्रव्याणामाहारद्र-व्याणाञ्च सेवनं प्राधान्येन करणीयम्। किन्त्वनेन सहैव पित्तस्य शमनात्मकानामप्यौषधान्नविहाराणां सेवनमावश्यकं वर्तते, यतो हि सिद्धान्तश्चैष वर्तते यथा-**

**चय एव जयेद्दोषं कुपितं त्वविरोधयन्।**
**सर्वकोपे बलीयांशं शेषदोषाविरोधतः।।**
**( अ.हृ.सू. 13/15 )**

वर्षाकाल में तो जाठराग्नि की मन्दता होती है, आदानकाल के स्वभाव वाली ग्रीष्मपर्यन्त (शिशिर, वसन्त, ग्रीष्म) तीन ऋतुओं को जो शरीर सहन करता है वह तो दुर्बल होता है। यद्यपि वर्षाकाल से विसर्ग का प्रारम्भ होता है फिर भी आदान का अन्तिम काल ग्रीष्म पूर्णरूप से सन्तप्त होता है। उससे श्रान्त (शारीरिक रूप से थका हुआ) क्लान्त (मानसिकरूप से थका हुआ) दुर्बल शरीर पाचकाग्नि की दुर्बलता के कारण सम्यक् पोषण प्राप्त नहीं कर सकता है, इस समय में ग्रीष्मकाल में सञ्चित वायु वर्षा के कालस्वभाव के कारण प्रकुपित होता है। इसके साथ ही अम्ल विपाकवाले जल तथा औषधियों के कारण पित्त का सञ्चय होता है, किन्तु काल के शीतस्वभाववाला होने के कारण वह पित्त प्रकोपण में समर्थ नहीं होता है। इसलिए वर्षाकाल में वात का शमन करने वाले औषधद्रव्यों का और आहार-द्रव्यों का सेवन प्रधानरूप से करना

चाहिए। किन्तु इसके साथ ही पित्त का शमन करने वाले औषध, अन्न और विहार का सेवन आवश्यक है। क्योंकि यही सिद्धान्त है, यथा-

दोष का अवजयन सञ्चयावस्था में ही कर लेना चाहिए और यदि दोष प्रकुपित हो चुका है तो (अन्य किसी दोष का या स्थिति का) विरोध किए विना ही उसको जीतना चाहिए। यदि अब दोषों का प्रकोप है तो उनमें बलशाली दोष को शेष दोषों का विरोध किए विना जीतना चाहिए।

**अत्र केषाञ्चिद् योगानामुल्लेखः क्रियते यैः प्रकुपितस्य वातस्य शमनं भवति चीयमानस्य च पित्तदोषस्यावजयनं निर्हरणशमनमाध्यमेन भवति। यथा हि-**

**एलादिचूर्णम्-**

**सूक्ष्मैला-नागकेशर-त्वक्-पत्र-तालीसपत्र-तुगाक्षीरी-बीजरहितद्राक्षा-दाडिमबीज-धान्यक-कृष्णजीरक-श्वेतजीरकेत्येतेषां द्रव्याणां पृथक्-पृथक् रूपेण विंशतिग्रामपरिमाणे ग्रहणं करणीयम्, पिप्पली-पिप्पलीमूल-चव्य-चित्रकमूल-शुण्ठी-मरिच-यवानी-तिन्तिडीक-अम्लवेतस-अश्वगन्धा-त्वग्विरहित-कपिकच्छुबीजानां पृथक्-पृथक्रूपेण दशग्राम-परिमाणे ग्रहणमपेक्षितं वर्तते, समेषामेतेषां द्रव्याणां सूक्ष्मं चूर्णं विधाय 160 ग्रामपरिमितायाः सितोपलायाः सुसूक्ष्मं चूर्णमत्र सम्मिश्र्य सुशुद्धे पात्रे पूरणीयमिदं चूर्णम्। चूर्णस्य ग्रामत्रयपरिमाणमिदं चूर्णं क्षौद्रेण सह वर्षाकाले सेवनीयम्।**

यहाँ कुछ योगों का उल्लेख किया जा रहा है जिनसे प्रकुपित वात का शमन होता है और सञ्चित होते हुए पित्त का अवजयन निर्हरण तथा शमन के माध्यम से होता है जैसे-

**एलादिचूर्ण-**

छोटी इलायची, नागकेशर, दालचीनी, तेजपत्र तालीसपत्र, वंशलोचन, बीज निकली हुई मुनक्का, अनारदाना, धनिया, कालाजीरा, सफेद जीरा इन द्रव्यों को पृथक्-पृथक् रूप से 20-20 ग्राम की मात्रा में लेना चाहिए, पिप्पली, पिप्पलीमूल, चव्य, चित्रकमूल, सोंठ, मरिच, अजवायन, डॉसरिया, अम्लवेतस, अश्वगन्धा, छिलकारहित कौंचबीज, इन सबको पृथक्-पृथक् रूप से दस-दस ग्राम की मात्रा में लेना चाहिए, इन सम्पूर्ण द्रव्यों का सूक्ष्मचूर्ण बना कर 160 ग्राम मिश्री का सूक्ष्म चूर्ण इसमें मिला कर शुद्ध पात्र में इस चूर्ण को रख लेना चाहिए। तीन ग्राम की मात्रा में यह चूर्ण शहद के साथ वर्षाकाल में सेवन करना चाहिए।

**एलादिचूर्णस्य सेवनेन वातस्य शमनं भवति, वर्षाकाले कदाचिज्जायमानायां छर्द्यान्त्विदं चूर्णममृत-तुल्यं लाभदायकं भवति। विशेषेण पित्तस्य शमनं करोत्यत एव वर्षाकाले चीयमाने पित्ते श्रेष्ठं शमनात्मकमिदं चूर्णम्।**

**चोपचीन्यादिचूर्णम्-**

**द्वीपान्तरवचा विशेषेण वातव्याधीनपस्मारमुन्मादं तनुवेदनाञ्च नाशयति। चोपचीन्यादिचूर्णेऽस्या एव प्राधान्यं वर्तते। द्वीपान्तरवचा 160 ग्रामपरिमिता, शर्करा तु 40 ग्राम परिमिता, पिप्पली-पिप्पलीमूल-लवङ्ग-मरिच-आकारकरभ-पारसीकयवानी-शुण्ठी-विडङ्ग-त्वगित्येतानां नवसंख्यकानां, द्रव्याणां पृथक्-पृथक् रूपेण 10 ग्रामपरिमितायां मात्रायां ग्रहणं कृत्वा सर्वेषां द्रव्याणां सुसूक्ष्मं चूर्णं विधेयम्। चोपचीन्यादिचूर्णमिति नाम्ना प्रसिद्धस्यास्य सेवनं ग्रामत्रयपरिमितायां मात्रायां प्रातः सायं दुग्धे-नोष्णोदकेन वा करणीयम्।**

एलादिचूर्ण के सेवन से वात का शमन होता है, वर्षाकाल में कभी-कभी होने वाले वमन में तो यह चूर्ण अमृत के समान लाभदायक होता है। यह चूर्ण विशेष रूप से पित्त का शमन करता है, इसलिए वर्षाकाल में सञ्चित होते हुए पित्त में यह श्रेष्ठ शमनात्मक है।

**चोपचीन्यादि चूर्ण-**

चोपचीनी विशेषरूप से वातव्याधियों को, अपस्मार को, उन्माद को और शरीर की वेदना को नष्ट करती है। चोपचीन्यादिचूर्ण में इसी की प्रधानता है। द्वीपान्तरवचा (चोपचीनी) 160 ग्राम मिश्री या खाँड 40 ग्राम, पिप्पली, पिप्पलीमूल, लौंग, मरिच, अकरकरा, खुरासानी अजवायन, सोंठ, वायविडङ्ग, दालचीनी इन नौ द्रव्यों को पृथक्-पृथक् रूप से 10-10 ग्राम की मात्रा में ले कर सभी द्रव्यों का सूक्ष्म चूर्ण करना चाहिए। चोपचीन्यादिचूर्ण इस नाम से प्रसिद्ध इस चूर्ण का सेवन तीन ग्राम की मात्रा में प्रातः सायं दूध से या गर्म पानी से करना चाहिए।

**वर्षाकाले सञ्जातानां व्रणानां प्रशमकमेतच्चूर्णं सर्वेषु त्वग्विकारेषु हितकारकं वर्तते। दद्रुविनाशक-मेतत्कण्डूनाशने समर्थं वर्तते। वर्षाजनितानामरूंषि-काणामपि निवारणं प्रशमनञ्च करोत्येतच्चूर्णम्।**

**बिल्वफलादिचूर्णम्-**

**वर्षासु दूषितजलसेवनेन विकृतानां फलानां शाकानां वा सेवनेन मन्दाग्नेः जनस्य प्रायोऽतिसारो जायते। तस्य निवारणार्थं बिल्वफलादिचूर्णस्य प्रयोगः हितावहो भवति। ये हि स्वस्थाः जनाः चूर्णस्यास्य वर्षाकाले प्रयोगं कुर्वन्ति ते दूषितजलजनितैः विकारैः पीडिताः न भवन्ति। अस्य सेवनेन सरक्ता प्रवाहिका विनश्यति। निरापदं ह्येतच्चूर्णम् जाठराग्निवर्धकमपि वर्तते।**

वर्षाकाल में उत्पन्न व्रणों (घावों) को ठीक करने वाला यह चूर्ण त्वचा के सभी विकारों में हितकारक है। दद्रु को नष्ट करने वाला यह चूर्ण खुजली को नष्ट करने में समर्थ है। वर्षा के कारण उत्पन्न होने वाली फुंसियों को नष्ट करता है और प्रशमन (शान्त) करता है यह चूर्ण।

**बिल्वफलादिचूर्ण-**

वर्षा में दूषित जल के सेवन से तथा विकृत फलों के या शाकों से सेवन से मन्दाग्नि वाले पुरुष के प्रायः अतिसार हो जाता है। उसके निवारण के लिए बिल्वफलादिचूर्ण का प्रयोग हितकारक होता है। जो लोग स्वस्थ है तंथा इस चूर्ण का प्रयोग वर्षा में करते हैं वे दूषित जल से उत्पन्न होने वाले विकारों से पीडित नहीं होते हैं। इसके सेवन से रक्तयुक्त प्रवाहिका नष्ट हो जाती है। निरापद यह चूर्ण जाठराग्नि को बढाने वाला भी होता है।

**बिल्वफलमज्जा-मुस्तक-सुगन्धबाला-मोचरस-इन्द्रयवेत्येतानां द्रव्याणां सममात्रायां ग्रहणं कृत्वा सुसूक्ष्मं चूर्णं विधेयम्। अस्य चूर्णस्य ग्रामत्रय-परिमितायां मात्रायां तक्रेण सेवनं करणीयम्। प्रतिदिनं वारद्वयं ग्रहणेनेदं चूर्णमतिसार-प्रवाहिका-ग्रहणीदोषेषु हितकारकं भवति। आमदोषस्य निर्हरणमपवारणञ्च करोतीदम्।**

**अन्येन विधिना द्रव्यान्तरसंयोगेनाप्यस्य निर्मिति-र्भवति। यथा हि- बिल्वफलमज्जा-मुस्तक-धातकी-पाठा-शुण्ठी-मोचरसनामकानां सर्वेषां द्रव्याणां सममात्रया ग्रहणं कृत्वा चूर्णं विधेयम्। उपर्युक्तेन विधिनैवास्य सेवनं सुखकारकं भवति। चरक-चतुरानन-चक्रपाणिदत्तेनास्य चूर्णस्योल्लेखः चक्रदत्त-नामके ग्रन्थे विहतः।**

बिल्वफल की मज्जा (बेलगिरी), नागर-मोथा, सुगन्धबाला, मोचरस और इन्द्र जौ इन द्रव्यों को समान मात्रा में लेकर सूक्ष्म चूर्ण बनाना चाहिए। इस चूर्ण का तीन ग्राम की मात्रा में तक्र से सेवन करना चाहिए। प्रतिदिन दो बार लेने से यह चूर्ण अतिसार, प्रवाहिका और ग्रहणीदोष मैं हितकारक होता है। यह आमदोष को बनने से रोकता है और निर्हरण करता है।

दूसरी विधि से अन्य द्रव्यों के संयोग से भी इसका निर्माण होता है। जैसे-बेलगिरी, नागरमोथा, धाय के फूल, पाठा, सौंठ और मोचरस इन सब द्रव्यों को समान मात्रा में लेकर चूर्ण बनाना चाहिए। उपर्युक्त विधि से ही इसका सेवन सुखकारक होता है। चरकचतुरानन चक्रपाणिदत्त ने इस चूर्ण का उल्लेख चक्रदत्त नाम के ग्रन्थ में किया है।

**80, सेनापति हाउस के पीछे, प्रेमनगर,**

**झोटवाड़ा, जयपुर**

# अथ षट्दर्शनसारदर्शकपत्रकम्

❑ अंजना शर्मा

| विषयः | पूर्वमीमांसा | उत्तरमीमांसा | न्यायः | वैशेषिकः | सांख्यः | योगः |
|---|---|---|---|---|---|---|
| जगत् | स्वरूपसै अनादि। अनंत प्रवाहरूप संयोगावियोगेवान् | नामरूप क्रियात्मके मायाका परिणाम चेतन का विवर्त्त | परमाणु आरंभित संयोगवियोगजन्य आकृतिविशेष | परमाणु आरंभित संयोगवियोगजन्य आकृतिविशेष | प्रकृतिपरिणाम त्रयोविंशतितत्त्वात्मक | प्रकृतिपरिणाम त्रयोविंशतित्त्वात्मक |
| जगत्कारण | जीव अद्दष्ट परमाणु | अभिन्ननिमित्तो-पादान ईश्वर | परमाणु ईश्वरादिनव | परमाणु ईश्वरादिनव | त्रिगुणात्मक प्रकृति | कर्मानुसार प्रकृति और तन्नियामक ईश्वर |
| ईश्वर | | मायाविशिष्टचेतन | नित्य इच्छाज्ञानादि गुणवान् विभु कर्त्ता विशेष | नित्य इच्छाज्ञानादि गुणवान् विभु कर्त्ता विशेष | | क्लेशकर्मविपाक आशय असंबद्धपुरुष विशेष |
| जीव | जडचेतनात्मक विभु नाना कर्त्ता भोक्ता | अविद्याविशिष्ट-चेतन | ज्ञानादिचतुर्दशगुणवान् कर्त्ता भोक्ताजड़ विभु नाना | शनादिचतुर्दशगुणवान् कर्त्ता भोक्ता जड़ विभु नाना | असंग चेतन विभु नाना भोक्ता | असंग चेतन विभु नाना कर्त्ता भोक्ता |
| बंधहेतु | निषिद्धकर्म | अविद्या | अज्ञान | अज्ञान | अविवेक | अविवेक |
| बंध | नरकादि दु:खसंबंध | अविद्यातत्कार्य | एकविंशति दु:ख | एकविंशतिदु:ख | अध्यात्मादि त्रिविध दु:ख | प्रकृतिपुरुषसंयोग जन्म अविद्यादिपंच क्लेश |
| मोक्ष | स्वर्गप्राप्ति | अविद्यातत्कार्य निवृत्तिपूर्वक परमानंद ब्रह्मप्राप्ति | एकविंशतिदु:खध्वंस | एकविंशतिदु:खध्वंस | त्रिविधदु:खध्वंस | प्रकृतिपुरुषसंयोग भावपूर्वक अविद्यादिपंचक्लेश निवृत्ति |
| मोक्ष साधन | वेदविहितकर्म | ब्रह्मात्मैक्यज्ञान | इतरभिन्नात्मज्ञान | इतभिन्नात्मकज्ञान | प्रकृतिपुरुषविवेक | निर्विकल्पसमाधि पूर्वक विवेक |
| अधिकारी | कर्मफलासक्त | मलविक्षेपदोषरहित चतुष्टयसाधनसंपन्न | दु:खजिहासु कुतर्की | दु:खजिहासुकुतर्की | संदिग्ध विरक्त | विक्षिप्तचित्तवान् |
| प्रकटकर्त्ता आचार्य | जैमिनि | वेदव्यास | गौतम | कणाद | कपिल | पतंजलि |
| प्रधानकांड | कर्मकांड | ज्ञानकांड | ज्ञानकांड | ज्ञानकांड | ज्ञानकांड | उपासनाकांड |
| वाद | आरंभवाद | विवर्त्तवाद | आरंभवाद | आरंभवाद | परिणामवाद | परिणामवाद |
| आत्मपरि-माण संख्या | विभु नाना | विभु एक | विभु नाना | विभु नाना | विभु नाना | विभु नाना |
| प्रमाण | षट् (६) | षट् (६) | प्रत्यक्ष अनुमान उपमान शब्द (४) | प्रत्यक्ष अनुमान (२) | प्रत्यक्ष अनुमान शब्द (३) | प्रत्यक्ष अनुमान शब्द (३) |
| ख्याति | अख्याति | अनिर्वचनीय | अन्यथा | अन्यथा | अख्याति | अख्याति |
| सत्ता | जीवजगत् परमार्थ सत्ता | परमार्थरूपात्मसत्ता व्यावहारिक और प्रातिभासिकजगत् सत्ता | जीवजगत् परमार्थ सत्ता | जीवजगत् परमार्थ सत्ता | जीवजगत् परमार्थ सत्ता | जीवजगत् परमार्थ सत्ता |
| उपयोग | चित्तशुद्धि | तत्त्वज्ञानपूर्वक मोक्ष | मनन | मनन | 'त्वं' पदार्थशोधन | चितैकाय |

विभागाध्यक्षः (दर्शन-विभागः)
श्रीदादू-आचार्य-संस्कृत-महाविद्यालयः, जयपुरम्

प्रेषण–प्रत्येक माह की ५ तारीख सी.एस.ओ. गांधीनगर, जयपुर
पंजीयन क्रमांक (भारत) आर. एन. आई. ३७५८–५७

डाक पंजीयन
Jaipur City/429/2015-17

हार्दिक शुभकामनाओं सहित :-

निर्माता

# ए इन्फ्रास्ट्रक्चर लिमिटेड

## ए.सी. प्रेशर पाइप्स

तकनीकी रूप से सर्वोत्तम, पेयजल, कृषि, सीवरेज एवम् सेनिटेशन में उपयोगी
तथा धातु निर्मित पाइपों की अपेक्षा सस्ते और टिकाऊ
फाइबर सीमेंट की नालीदार चादरें

## छत्त एक, लाभ अनेक

हमीरगढ़ भीलवाड़ा - 311025 (राजस्थान) दूरभाषः 01482-286106/07
दिल्ली कार्यालयः ए-9, ग्रीन पार्क मैन, नई दिल्ली-110016 दूरभाषः- 011-26850488
जयपुर पाइप कार्यालय : 411, तीसरी मंजिल, शालीमार काम्प्लेक्स, चर्च रोड़, एम.आई.रोड़, जयपुर
फोनः 0141-2369691, 2370566, फैक्स : 0141-4019691
जयपुर चादरें कार्यालयः शोरूम नं. 2, फर्स्ट फ्लोर, नियर रिद्धी-सिद्धी स्वीट्स, लिंक रोड़, गोपालपुरा, जयपुर
फोन : 0141-3206915, फैक्सः- 0141-2763656

## राष्ट्रीय विचारों के लिए पढ़ें

# पाञ्चजन्य Organiser

### हमारी विशेषताएं

- राष्ट्रीय दृष्टिकोण
- 6 दशकों से लगातार प्रकाशित
- संसद तथा विधान सभाओं को गुंजायमान करने वाला पत्र
- विश्वसनीय प्रतिष्ठित दायित्वपूर्ण पत्रकारिता
- हजारों शैक्षिक, व्यावसायिक प्रतिष्ठानों एवं पुस्तकालयों में पहुंच
- ई–पेपर की सुविधा

You can subscribe **Panchjanya/Organiser** Weeklies Online through our **Websites: www.panchjanya.com, www.organiser.org**

**ग्राहक शुल्क भारत में : वार्षिक शुल्क रु. 625/- एवं द्विवार्षिक रु. 1100/-**

विदेशों में (हवाई डाक द्वारा) : वार्षिक शुल्क ... **$ 60**

**Reach millions of consumers through our weeklies**

## भारत प्रकाशन (दिल्ली) लि.

2322, लक्ष्मीनारायण स्ट्रीट, पहाड़गंज, नई दिल्ली-11005 www.organiser.org & www.panchjanya.com
दूरभाषः 011-47642000 से 30 फैक्सः 011-47642015 E-mail: circ@pbdl.in

स्वत्वाधिकारी–भारतीयसंस्कृतप्रचारसंस्थानम्, राजस्थानम् दूरभाषः २३७९०१४ प्रकाशको मुद्रकश्च माणकचन्द माहेश्वरी द्वारा न्यू जय शिवा प्रिन्टर्स, गोपालबाड़ी, जयपुरम् दूरभाषः २३६५७२१ पत्रसंकेतः– भारतीभवनम्, बी–१५ न्यू कॉलोनी, जयपुरम्–३०२ ००१ भारतीयसंस्कृतप्रचार संस्थानस्य अध्यक्षः शंकर प्रसाद शुक्लः

प्रतिष्ठायाम्,